# અધ્યાત્મરામાયણે ઉત્તરકાણ્ડમ્

adhyAtmarAmAyaNe uttarakANDam

sanskritdocuments.org

September 29, 2018

# adhyAtmarAmAyaNe uttarakANDam

# અધ્યાત્મરામાયણે ઉત્તરકાણ્ડમ્

## Sanskrit Document Information

Text title : adhyAtma rAmAyaNa uttara kANDa

File name : adhyaatmaRamuttara.itx

Category : adhyAtmarAmAyaNa, raama, vyAsa

Location : doc_raama

Author : Shri Veda Vyas

Transliterated by : Vishwas Bhide vishwas underscore bhide at yahoo.com

Proofread by : Vishwas Bhide, PSA Easwaran, ahimsasoldier

Latest update : June 20, 2005, April 4, 2015

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 29, 2018

*sanskritdocuments.org*

# અધ્યાત્મરામાયણે ઉત્તરકાણ્ડમ્

## ॥ પ્રથમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
જયતિ રઘુવંશતિલકઃ કૌસલ્યાહૃદયનન્દનો રામઃ ।
દશવદનનિધનકારી દાશરથિઃ પુણ્ડરીકાક્ષઃ ॥ ૧॥

પાર્વત્યુવાચ ।
અથ રામઃ કિમકરોત્કૌસલ્યાનન્દવર્ધનઃ ।
હત્વા મૃધે રાવણાદીન્ રાક્ષસાન્ ભીમવિક્રમઃ ॥ ૨॥

અભિષિક્તસ્ત્વયોધ્યાયાં સીતયા સહ રાઘવઃ ।
માયામાનુષતાં પ્રાપ્ય કતિ વર્ષાણિ ભૂતલે ॥ ૩॥

સ્થિતવાન્ લીલયા દેવઃ પરમાત્મા સનાતનઃ ।
અત્યજન્માનુષં લોકં કથમન્તે રઘૂદ્વહઃ ॥ ૪॥

એતદાખ્યાહિ ભગવન્ શ્રદ્દધત્યા મમ પ્રભો ।
કથાપીયુષમાસ્વાદ્ય તૃષ્ણા મેઽતીવ વર્ધતે ।
રામચન્દ્રસ્ય ભગવન્ બ્રૂહિ વિસ્તરશઃ કથામ્ ॥ ૫॥

શ્રીમહાદેવ ઉવાચ ।
રાક્ષસાનાં વધં કૃત્વા રાજ્યે રામ ઉપસ્થિતે ।
આયયુર્મુનયઃ સર્વે શ્રીરામમભિવન્દિતુમ્ ॥ ૬॥

વિશ્વામિત્રોઽસિતઃ કણ્વો દુર્વાસા ભૃગુરઙ્ગિરાઃ ।
કશ્યપો વામદેવોઽત્રિસ્તથા સપ્તર્ષયોઽમલાઃ ॥ ૭॥

અગસ્ત્યઃ સહ શિષ્યૈશ્ચ મુનિભિઃ સહિતોઽભ્યગાત્ ।
દ્વારમાસાદ્ય રામસ્ય દ્વારપાલમથાબ્રવીત્ ॥ ૮॥

બ્રૂહિ રામાય મુનયઃ સમાગત્ય બહિઃસ્થિતાઃ ।

અગસ્ત્યપ્રમુખાઃ સર્વે આશીર્ભિરભિનન્દિતુમ્ ॥ ૯॥

પ્રતીહારસ્તતો રામમગસ્ત્યવચનાદ્ દ્રુતમ્ ।
નમસ્કૃત્યાબ્રવીદ્વાક્યં વિનયાવનતઃ પ્રભુમ્ ॥ ૧૦॥

કૃતાઞ્જલિરુવાચેદમગસ્ત્યો મુનિભિઃ સહ ।
દેવ ત્વદ્દર્શનાર્થાય પ્રાપ્તો બહિરુપસ્થિતઃ ॥ ૧૧॥

તમુવાચ દ્વારપાલં પ્રવેશય યથાસુખમ્ ।
પૂજિતા વિવિશુર્વેશ્મ નાનારત્નવિભૂષિતમ્ ॥ ૧૨॥

દૃષ્ટ્વા રામો મુનીન્ શીઘ્રં પ્રત્યુત્થાય કૃતાઞ્જલિઃ ।
પાદ્યાર્ઘ્યાદિભિરાપૂજ્ય ગાં નિવેદ્ય યથાવિધિ ॥ ૧૩॥

નત્વા તેભ્યો દદૌ દિવ્યાન્યાસનાનિ યથાર્હતઃ ।
ઉપવિષ્ટા પ્રહૃષ્ટાશ્ચ મુનયો રામપૂજિતાઃ ॥ ૧૪॥

સમ્પૃષ્ટકુશલાઃ સર્વે રામં કુશલમબ્રુવન્ ।
કુશલં તે મહાબાહો સર્વત્ર રઘુનન્દન ॥ ૧૫॥

દિષ્ટ્યેદાનીં પ્રપશ્યામો હતશત્રુમરિન્દમ ।
ન હિ ભારઃ સ તે રામ રાવણો રાક્ષસેશ્વરઃ ॥ ૧૬॥

સધનુસ્ત્વં હિ લોકાંસ્ત્રીન્ વિજેતું શક્ત એવ હિ ।
દિષ્ટ્યા ત્વયા હતાઃ સર્વે રાક્ષસા રાવણાદયઃ ॥ ૧૭॥

સહ્યમેતન્મહાબાહો રાવણસ્ય નિબર્હણમ્ ।
અસહ્યમેતત્સમ્પ્રાપ્તં રાવણેર્યન્નિષૂદનમ્ ॥ ૧૮॥

અન્તકપ્રતિમાઃ સર્વે કુમ્ભકર્ણાદયો મૃધે ।
અન્તકપ્રતિમૈર્બાણૈર્હતાસ્તે રઘુસત્તમ ॥ ૧૯॥

દત્તા ચેયં ત્વયાસ્માકં પુરા હ્યભયદક્ષિણા ।
હત્વા રક્ષોગણાન્ સઙ્ખ્યે કૃતકૃત્યોઽદ્ય જીવસિ ॥ ૨૦॥

શ્રુત્વા તુ ભાષિતં તેષાં મુનીનાં ભાવિતાત્મનામ્ ।
વિસ્મયં પરમં ગત્વા રામઃ પ્રાઞ્જલિરબ્રવીત્ ॥ ૨૧॥

રાવણાદીનતિક્રમ્ય કુમ્ભકર્ણાદિરાક્ષસાન્ ।
ત્રિલોકજયિનો હિત્વા કિં પ્રશંસથ રાવણિમ્ ॥ ૨૨॥

તતસ્તદ્વચનં શ્રુત્વા રાઘવસ્ય મહાત્મનઃ ।
કુમ્ભયોનિર્મહાતેજા રામં પ્રીત્યા વચોઽબ્રવીત્ ॥ ૨૩॥

શૃણુ રામ યથા વૃત્તં રાવણે રાવણસ્ય ચ ।
જન્મ કર્મ વરાદાનં સઙ્ક્ષેપાદ્વદતો મમ ॥ ૨૪॥

પુરા કૃતયુગે રામ પુલસ્ત્યો બ્રહ્મણઃ સુતઃ ।
તપસ્તમું ગતો વિદ્વાન્ મેરોઃ પાર્શ્વં મહામતિઃ ॥ ૨૫॥

તૃણબિન્દોરાશ્રમેઽસૌ ન્યવસન્મુનિપુઙ્ગવઃ ।
તપસ્તેપે મહાતેજાઃ સ્વાધ્યાયનિરતઃ સદા ॥ ૨૬॥

તત્રાશ્રમે મહારમ્યે દેવગન્ધર્વકન્યકાઃ ।
ગાયન્ત્યો નનૃતુસ્તત્ર હસન્ત્યો વાદયન્તિ ચ ॥ ૨૭॥

પુલસ્ત્યસ્ય તપોવિઘ્નં ચક્રુઃ સર્વા અનિન્દિતાઃ ।
તતઃ ક્રુદ્ધો મહાતેજા વ્યાજહાર વચો મહત્ ॥ ૨૮॥

યા મે દૃષ્ટિપથં ગચ્છેત્સા ગર્ભં ધારયિષ્યતિ ।
તાઃ સર્વાઃ શાપસંવિગ્ના ન તં દેશં પ્રચક્રમુઃ ॥ ૨૯॥

તૃણબિન્દોસ્તુ રાજર્ષેઃ કન્યા તન્નાશૃણોદ્વચઃ ।
વિચચાર મુનેરગ્રે નિર્ભયા તં પ્રપશ્યતી ॥ ૩૦॥

બભૂવ પાણ્ડુરતનુર્વ્યઞ્જિતાન્તઃશરીરજા ।
દૃષ્ટ્વા સા દેહવૈવર્ણ્યં ભીતા પિતરમન્વગાત્ ॥ ૩૧॥

તૃણબિન્દુશ્ચ તાં દૃષ્ટ્વા રાજર્ષિરમિતદ્યુતિઃ ।
ધ્યાત્વા મુનિકૃતં સર્વમવૈદ્વિજ્ઞાનચક્ષુષા ॥ ૩૨॥

તાં કન્યાં મુનિવર્યાય પુલસ્ત્યાય દદૌ પિતા ।
તાં પ્રગૃહ્યાબ્રવીત્કન્યાં બાઢમિત્યેવ સ દ્વિજઃ ॥ ૩૩॥

શુશ્રૂષણપરાં દૃષ્ટ્વા મુનિઃ પ્રીતોઽબ્રવીદ્વચઃ ।
દાસ્યામિ પુત્રમેકં તે ઉભયોર્વંશવર્ધનમ્ ॥ ૩૪॥

તતઃ પ્રાસૂત સા પુત્રં પુલસ્ત્યાલ્લોકવિશ્રુતમ્ ।
વિશ્રવા ઇતિ વિખ્યાતઃ પૌલસ્ત્યો બ્રહ્મવિન્મુનિઃ ॥ ૩૫॥

તસ્ય શીલાદિકં દૃષ્ટ્વા ભરદ્વાજો મહામુનિઃ ।
ભાર્યાર્થં સ્વાં દુહિતરં દદૌ વિશ્રવસે મુદા ॥ ૩૬॥

તસ્યાં તુ પુત્રઃ સઞ્જજ્ઞે પૌલસ્ત્યાલ્લોકસમ્મતઃ ।
પિતૃતુલ્યો વૈશ્રવણો બ્રહ્મણા ચાનુમોદિતઃ ॥ ૩૭॥

દદૌ તત્તપસા તુષ્ટો બ્રહ્મા તસ્મૈ વરં શુભમ્ ।
મનોઽભિલષિતં તસ્ય ધનેશત્વમખણ્ડિતમ્ ॥ ૩૮॥

તતો લબ્ધવરઃ સોઽપિ પિતરં દ્રષ્ટુમાગતઃ ।
પુષ્પકેણ ધનાધ્યક્ષો બ્રહ્મદત્તેન ભાસ્વતા ॥ ૩૯॥

નમસ્કૃત્યાથ પિતરં નિવેદ્ય તપસઃ ફલમ્ ।
પ્રાહ મે ભગવાન્ બ્રહ્મા દત્ત્વા વરમનિન્દિતમ્ ॥ ૪૦॥

નિવાસાય ન મે સ્થાનં દત્તવાન્ પરમેશ્વરઃ ।
બ્રૂહિ મે નિયતં સ્થાનં હિંસા યત્ર ન કસ્યચિત્ ॥ ૪૧॥

વિશ્રવા અપિ તં પ્રાહ લઙ્કાનામ પુરી શુભા ।
રાક્ષસાનાં નિવાસાય નિર્મિતા વિશ્વકર્મણા ॥ ૪૨॥

ત્યક્ત્વા વિષ્ણુભયાદ્દૈત્યા વિવિશુસ્તે રસાતલમ્ ।
સા પુરી દુષ્પ્રધર્ષાન્યૈર્મધ્યેસાગરમાસ્થિતા ॥ ૪૩॥

તત્ર વાસાય ગચ્છ ત્વં નાન્યૈઃ સાધિષ્ઠિતા પુરા ।
પિત્રાદિષ્ટસ્ત્વસૌ ગત્વા તાં પુરીં ધનદોઽવિશત્ ॥ ૪૪॥

સ તત્ર સુચિરં કાલમુવાસ પિતૃસમ્મતઃ ।
કસ્યચિત્ત્વથ કાલસ્ય સુમાલી નામ રાક્ષસઃ ॥ ૪૫॥

રસાતલાન્મર્ત્યલોકં ચચાર પિશિતાશનઃ ।
ગૃહીત્વા તનયાં કન્યાં સાક્ષાદ્દેવીમિવ શ્રિયમ્ ॥ ૪૬॥

અપશ્યદ્ધનદં દેવં ચરન્તં પુષ્પકેણ સઃ ।
હિતાય ચિન્તયામાસ રાક્ષસાનાં મહામનાઃ ॥ ૪૭॥

ઉવાચ તનયાં તત્ર કૈકસીં નામ નામતઃ ।
વત્સે વિવાહકાલસ્તે યૌવનં ચાતિવર્તતે ॥ ૪૮॥

પ્રત્યાખ્યાનાચ્ચ ભીતૈસ્ત્વં ન વરૈર્ગૃહ્યસે શુભે ।
સા ત્વં વરય ભદ્રં તે મુનિં બ્રાહ્મકુલોદ્ભવમ્ ॥ ૪૯॥

સ્વયમેવ તતઃ પુત્રા ભવિષ્યન્તિ મહાબલાઃ ।

ઈદૃશાઃ સર્વશોભાઢ્યા ધનદેન સમાઃ શુભે ॥ ૫૦॥

તથેતિ સાઽઽશ્રમં ગત્વા મુનેરગ્રે વ્યવસ્થિતા ।
લિખન્તી ભુવમગ્રેણ પાદેનાધોમુખી સ્થિતા ॥ ૫૧॥

તામપૃચ્છન્મુનિઃ કા ત્વં કન્યાઽસિ વરવર્ણિનિ ।
સાબ્રવીત્પ્રાઞ્જલિર્બ્રહ્મન્ ધ્યાનેન જ્ઞાતુમર્હસિ ॥ ૫૨॥

તતો ધ્યાત્વા મુનિઃ સર્વં જ્ઞાત્વા તાં પ્રત્યભાષત ।
જ્ઞાતં તવાભિલષિતં મત્તઃ પુત્રાનભીપ્સસિ ॥ ૫૩॥

દારુણાયાં તુ વેલાયામાગતાસિ સુમધ્યમે ।
અતસ્તે દારુણૌ પુત્રૌ રાક્ષસૌ સમ્ભવિષ્યતઃ ॥ ૫૪॥

સાબ્રવીન્મુનિશાર્દૂલ ત્વત્તોઽપ્યેવંવિધૌ સુતૌ ।
તામાહ પશ્ચિમો યસ્તે ભવિષ્યતિ મહામતિઃ ॥ ૫૫॥

મહાભાગવતઃ શ્રીમાન્ રામભક્ત્યેકતત્પરઃ ।
ઇત્યુક્ત્વા સા તથા કાલે સુષુવે દશકન્ધરમ્ ॥ ૫૬॥

રાવણં વિંશતિભુજં દશશીર્ષં સુદારુણમ્ ।
તદ્રક્ષોજાતમાત્રેણ ચચાલ ચ વસુન્ધરા ॥ ૫૭॥

બભૂવુર્નાશહેતૂનિ નિમિત્તાન્યખિલાન્યપિ ।
કુમ્ભકર્ણસ્તતો જાતો મહાપર્વતસન્નિભઃ ॥ ૫૮॥

તતઃ શૂર્પણખા નામ જાતા રાવણસોદરી ।
તતો વિભીષણો જાતઃ શાન્તાત્મા સૌમ્યદર્શનઃ ॥ ૫૯॥

સ્વાધ્યાયી નિયતાહારો નિત્યકર્મપરાયણઃ ।
કુમ્ભકર્ણસ્તુ દુષ્ટાત્મા દ્વિજાન્ સન્તુષ્ટચેતસઃ ॥ ૬૦॥

ભક્ષયન્નૃષિસઙ્ઘાંશ્ચ વિચચારાતિદારુણઃ ।
રાવણોઽપિ મહાસત્ત્વો લોકાનાં ભયદાયકઃ ।
વવૃધે લોકનાશાય હ્યામયો દેહિનામિવ ॥ ૬૧॥

રામ ત્વં સકલાન્તરસ્થમભિતો જાનાસિ વિજ્ઞાનદૃક્
સાક્ષી સર્વહૃદિ સ્થિતો હિ પરમો નિત્યોદિતો નિર્મલઃ ।
ત્વં લીલામનુજાકૃતિઃ સ્વમહિમન્ માયાગુણૈર્નાજ્યસે
લીલાર્થં પ્રતિચોદિતોઽદ્ય ભવતા વક્ષ્યામિ રક્ષોદ્ભવમ્ ॥ ૬૨॥

જાનામિ કેવલમનન્તમચિન્ત્યશક્તિં
ચિન્માત્રમક્ષરમજં વિદિતાત્મતત્ત્વમ્ ।
ત્વાં રામ ગૂઢનિજરૂપમનુપ્રવૃત્તો
મૂઢોઽપ્યહં ભવદનુગ્રહતશ્ચરામિ ॥ ૬૩॥

એવં વદન્તમિનવંશપવિત્રકીર્તિઃ
કુમ્ભોદ્ભવં રઘુપતિઃ પ્રહસન્ બભાષે ।
માયાશ્રિતં સકલમેતદનન્યકત્વાત્
મત્કીર્તનં જગતિ પાપહરં નિબોધ ॥ ૬૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે ઉત્તરકાણ્ડે
પ્રથમઃ સર્ગઃ ॥ ૧॥

## ॥ દ્વિતીય સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।

શ્રીરામવચનં શ્રુત્વા પરમાનન્દનિર્ભરઃ ।
મુનિઃ પ્રોવાચ સદસિ સર્વેષાં તત્ર શૃણ્વતામ્ ॥ ૧॥

અથ વિત્તેશ્વરો દેવસ્તત્ર કાલેન કેનચિત્ ।
આયયૌ પુષ્પકારૂઢઃ પિતરં દ્રષ્ટુમઞ્જસા ॥ ૨॥

દૃષ્ટ્વા તં કૈકસી તત્ર ભ્રાજમાનં મહૌજસમ્ ।
રાક્ષસી પુત્રસામીપ્યં ગત્વા રાવણમબ્રવીત્ ॥ ૩॥

પુત્ર પશ્ય ધનાધ્યક્ષં જ્વલન્તં સ્વેન તેજસા ।
ત્વમપ્યેવં યથા ભૂયાસ્તથા યત્નં કુરુ પ્રભો ॥ ૪॥

તચ્છ્રુત્વા રાવણો રોષાત્ પ્રતિજ્ઞામકરોદ્દ્રુતમ્ ।
ધનદેન સમો વાપિ હ્યધિકો વાચિરેણ તુ ॥ ૫॥

ભવિષ્યામ્યમ્બ માં પશ્ય સન્તાપં ત્યજ સુવ્રતે ।
ઇત્યુક્ત્વા દુષ્કરં કર્તું તપઃ સ દશકન્ધરઃ ॥ ૬॥

અગમત્ફલસિદ્ધ્યર્થં ગોકર્ણં તુ સહાનુજઃ ।
સ્વં સ્વં નિયમમાસ્થાય ભ્રાતરસ્તે તપો મહત્ ॥ ૭॥

આસ્થિતા દુષ્કરં ઘોરં સર્વલોકૈકતાપનમ્ ।
દશવર્ષસહસ્રાણિ કુમ્ભકર્ણોઽકરોત્તપઃ ॥ ૮॥

વિભીષણોઽપિ ધર્માત્મા સત્યધર્મપરાયણઃ ।
પઞ્ચવર્ષસહસ્રાણિ પાદેનૈકેન તસ્થિવાન્ ॥ ૯॥

દિવ્યવર્ષસહસ્રં તુ નિરાહારો દશાનનઃ ।
પૂર્ણે વર્ષસહસ્રે તુ શીર્ષમગ્નૌ જુહાવ સઃ ।
એવં વર્ષસહસ્રાણિ નવ તસ્યાતિચક્રમુઃ ॥ ૧૦॥

અથ વર્ષસહસ્રં તુ દશમે દશમં શિરઃ ।
છેત્તુકામસ્ય ધર્માત્મા પ્રાપ્તશ્ચાથ પ્રજાપતિઃ ।
વત્સ વત્સ દશગ્રીવ પ્રીતોઽસ્મીત્યભ્યભાષત ॥ ૧૧॥

વરં વરય દાસ્યામિ યત્તે મનસિ કાઙ્ક્ષિતમ્ ।
દશગ્રીવોઽપિ તચ્છ્રુત્વા પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૧૨॥

અમરત્વં વૃણોમીશ વરદો યદિ મે ભવાન્ ।
સુપર્ણનાગયક્ષાણાં દેવતાનાં તથાસુરૈઃ ।
અવધ્યત્વં તુ મે દેહિ તૃણભૂતા હિ માનુષાઃ ॥ ૧૩॥

તથાસ્ત્વિતિ પ્રજાધ્યક્ષઃ પુનરાહ દશાનનમ્ ।
અગ્નૌ હુતાનિ શીર્ષાણિ યાનિ તેઽસુરપુઙ્ગવ ॥ ૧૪॥

ભવિષ્યન્તિ યથાપૂર્વમક્ષયાણિ ચ સત્તમ ॥ ૧૫॥

એવમુક્ત્વા તતો રામ દશગ્રીવં પ્રજાપતિઃ ।
વિભીષણમુવાચેદં પ્રણતં ભક્તવત્સલઃ ॥ ૧૬॥

વિભીષણ ત્વયા વત્સ કૃતં ધર્માર્થમુત્તમમ્ ।
તપસ્તતો વરં વત્સ વૃણીષ્વાભિમતં હિતમ્ ॥ ૧૭॥

વિભીષણોઽપિ તં નત્વા પ્રાઞ્જલિર્વાક્યમબ્રવીત્ ।
દેવ મે સર્વદા બુદ્ધિર્ધર્મે તિષ્ઠતુ શાશ્વતી ।
મા રોચયત્વધર્મં મે બુદ્ધિઃ સર્વત્ર સર્વદા ॥ ૧૮॥

તતઃ પ્રજાપતિઃ પ્રીતો વિભીષણમથાબ્રવીત્ ।
વત્સ ત્વં ધર્મશીલોઽસિ તથૈવ ચ ભવિષ્યસિ ॥ ૧૯॥

અયાચિતોઽપિ તે દાસ્યે હ્યમરત્વં વિભીષણ ।
કુમ્ભકર્ણમથોવાચ વરં વરય સુવ્રત ॥ ૨૦॥

વાણ્યા વ્યામોઽથ તં પ્રાહ કુમ્ભકર્ણઃ પિતામહમ્ ।
સ્વપ્સ્યામિ દેવ ષણ્માસાન્ દિનમેકં તુ ભોજનમ્ ॥ ૨૧॥

એવમસ્ત્વિતિ તં પ્રાહ બ્રહ્મા દૃષ્ટ્વા દિવૌકસઃ ।
સરસ્વતી ચ તદ્વક્ત્રાન્નિર્ગતા પ્રયયૌ દિવમ્ ॥ ૨૨॥

કુમ્ભકર્ણસ્તુ દુષ્ટાત્મા ચિન્તયામાસ દુઃખિતઃ ।
અનભિપ્રેતમેવાસ્યાત્કિં નિર્ગતમહો વિધિઃ ॥ ૨૩॥

સુમાલી વરલબ્ધાંસ્તાન્ જ્ઞાત્વા પૌત્રાન્ નિશાચરાન્ ।
પાતાલાન્નિર્ભયઃ પ્રાયાત્ પ્રહસ્તાદિભિરન્વિતઃ ॥ ૨૪॥

દશગ્રીવં પરિષ્વજ્ય વચનં ચેદમબ્રવીત્ ।
દિષ્ટ્યા તે પુત્ર સંવૃત્તો વાઞ્છિતો મે મનોરથઃ ॥ ૨૫॥

યદ્ભયાચ્ચ વયં લઙ્કાં ત્યક્ત્વા યાતા રસાતલમ્ ।
તદ્ગતં નો મહાબાહો મહદ્વિષ્ણુકૃતં ભયમ્ ॥ ૨૬॥

અસ્માભિઃ પૂર્વમુષિતા લઙ્કેયં ધનદેન તે ।
ભ્રાત્રાક્રાન્તામિદાનીં ત્વં પ્રત્યાનેતુમિહાર્હસિ ॥ ૨૭॥

સામ્ના વાથ બલેનાપિ રાજ્ઞાં બન્ધુઃ કુતઃ સુહૃત્ ।
ઇત્યુક્તો રાવણઃ પ્રાહ નાર્હસ્યેવં પ્રભાષિતુમ્ ॥ ૨૮॥

વિત્તેશો ગુરુરસ્માકમેવં શ્રુત્વા તમબ્રવીત્ ।
પ્રહસ્તઃ પ્રશ્રિતં વાક્યં રાવણં દશકન્ધરમ્ ॥ ૨૯॥

શૃણુ રાવણ યત્નેન નૈવં ત્વં વક્તુમર્હસિ ।
નાધીતા રાજધર્માસ્તે નીતિશાસ્ત્રં તથૈવ ચ ॥ ૩૦॥

શૂરાણાં ન હિ સૌભ્રાત્રં શૃણુ મે વદતઃ પ્રભો ।
કશ્યપસ્ય સુતા દેવા રાક્ષસાશ્ચ મહાબલાઃ ॥ ૩૧॥

પરસ્પરમયુધ્યન્ત ત્યક્ત્વા સૌહૃદમાયુધૈઃ ।
નૈવેદાનીન્તનં રાજન્ વૈરં દેવૈરનુષ્ઠિતમ્ ॥ ૩૨॥

પ્રહસ્તસ્ય વચઃ શ્રુત્વા દશગ્રીવો દુરાત્મનઃ ।
તથેતિ ક્રોધતામ્રાક્ષસ્ત્રિકૂટાચલમન્વગાત્ ॥ ૩૩॥

દૂતં પ્રહસ્તં સમ્પ્રેષ્ય નિષ્કાસ્ય ધનદેશ્વરમ્ ।
લઙ્કામાક્રમ્ય સચિવૈ રાક્ષસૈઃ સુખમાસ્થિતઃ ॥ ૩૪॥

ધનદઃ પિતૃવાક્યેન ત્યક્ત્વા લઙ્કાં મહાયશાઃ ।
ગત્વા કૈલાસશિખરં તપસાતોષયચ્છિવમ્ ॥ ૩૫॥

તેન સખ્યમનુપ્રાપ્ય તેનૈવ પરિપાલિતઃ ।
અલકાં નગરીં તત્ર નિર્મમે વિશ્વકર્મણા ॥ ૩૬॥

દિક્પાલત્વં ચકારાત્ર શિવેન પરિપાલિતઃ ।
રાવણો રાક્ષસૈઃ સાર્ધમભિષિક્તઃ સહાનુજૈઃ ॥ ૩૭॥

રાજ્યં ચકારાસુરાણાં ત્રિલોકીં બાધયન્ ખલઃ ।
ભગિનીં કાલખઞ્જાય દદૌ વિકટરૂપિણીમ્ ॥ ૩૮॥

વિદ્યુજ્જિહ્વાય નામ્નાસૌ મહામાયી નિશાચરઃ ।
તતો મયો વિશ્વકર્મા રાક્ષસાનાં દિતેઃ સુતઃ ॥ ૩૯॥

સુતાં મન્દોદરીં નામ્ના દદૌ લોકૈકસુન્દરીમ્ ।
રાવણાય પુનઃ શક્તિમમોઘાં પ્રીતમાનસઃ ॥ ૪૦॥

વૈરોચનસ્ય દૌહિત્રીં વૃત્રજ્વાલેતિ વિશ્રુતામ્ ।
સ્વયન્દત્તામુદવહત્કુમ્ભકર્ણાય રાવણઃ ॥ ૪૧॥

ગન્ધર્વરાજસ્ય સુતાં શૈલૂષસ્ય મહાત્મનઃ ।
વિભીષણસ્ય ભાર્યાર્થે ધર્મજ્ઞાં સમુદાવહત્ ॥ ૪૨॥

સરમાં નામ સુભગાં સર્વલક્ષણસંયુતામ્ ।
તતો મન્દોદરી પુત્રં મેઘનાદમજીજનત્ ॥ ૪૩॥

જાતમાત્રસ્તુ યો નાદં મેઘવત્પ્રમુમોચ હ ।
તતઃ સર્વેઽબ્રુવન્મેઘનાદોઽયમિતિ ચાસકૃત્ ॥ ૪૪॥

કુમ્ભકર્ણસ્તતઃ પ્રાહ નિદ્રા માં બાધતે પ્રભો ।
તતશ્ચ કારયામાસ ગુહાં દીર્ઘાં સુવિસ્તરામ્ ॥ ૪૫॥

તત્ર સુષ્વાપ મૂઢાત્મા કુમ્ભકર્ણો વિઘૂર્ણિતઃ ।
નિદ્રિતે કુમ્ભકર્ણે તુ રાવણો લોકરાવણઃ ॥ ૪૬॥

બ્રાહ્મણાન્ ઋષિમુખ્યાંશ્ચ દેવદાનવકિન્નરાન્ ।

દેવશ્રિયો મનુષ્યાંશ્ચ નિજઘ્ને સમહોરગાન્ ॥ ૪૭॥

ધનદોऽપિ તતઃ શ્રુત્વા રાવણસ્યાક્રમં પ્રભુઃ ।
અધર્મં મા કુરુષ્વેતિ દૂતવાક્યૈર્ન્યવારયત્ ॥ ૪૮॥

તતઃ ક્રુદ્ધો દશગ્રીવો જગામ ધનદાલયમ્ ।
વિનિર્જિત્ય ધનાધ્યક્ષં જહારોત્તમપુષ્પકમ્ ॥ ૪૯॥

તતો યમં ચ વરુણં નિર્જિત્ય સમરેऽસુરઃ ।
સ્વર્ગલોકમગાત્તુર્ણં દેવરાજજિઘાંસયા ॥ ૫૦॥

તતોऽભવન્મહદ્યુદ્ધમિન્દ્રેણ સહ દૈવતૈઃ ।
તતો રાવણમભ્યેત્ય બબન્ધ ત્રિદશેશ્વરઃ ॥ ૫૧॥

તચ્છ્રુત્વા સહસાગત્ય મેઘનાદઃ પ્રતાપવન્ ।
કૃત્વા ઘોરં મહદ્યુદ્ધં જિત્વા ત્રિદશપુઙ્ગવાન્ ॥ ૫૨॥

ઇન્દ્રં ગૃહીત્વા બધ્વાસૌ મેઘનાદો મહાબલઃ ।
મોચયિત્વા તુ પિતરં ગૃહીત્વેન્દ્રં યયૌ પુરમ્ ॥ ૫૩॥

બ્રહ્મા તુ મોચયામાસ દેવેન્દ્રં મેઘનાદતઃ ।
દત્ત્વા વરાન્ બહૂંસ્તસ્મૈ બ્રહ્મા સ્વભવનં યયૌ ॥ ૫૪॥

રાવણો વિજયી લોકાન્ સર્વાન્ જિત્વા ક્રમેણ તુ ।
કૈલાસં તોલયામાસ બાહુભિઃ પરિઘોપમૈઃ ॥ ૫૫॥

તત્ર નન્દીશ્વરેણૈવં શપ્તોऽયં રાક્ષસેશ્વરઃ ।
વાનરૈર્માનુષૈશ્ચૈવ નાશં ગચ્છેતિ કોપિના ॥ ૫૬॥

શપ્તોऽપ્યગણયન્ વાક્યં યયૌ હૈહયપત્તનમ્ ।
તેન બદ્ધો દશગ્રીવઃ પુલસ્ત્યેન વિમોચિતઃ ॥ ૫૭॥

તતોऽતિબલમાસાદ્ય જિઘાંસુર્હરિપુઙ્ગવમ્ ।
ધૃતસ્તેનૈવ કક્ષેણ વાલિના દશકન્ધરઃ ॥ ૫૮॥

ભ્રામયિત્વા તુ ચતુરઃ સમુદ્રાન્ રાવણં હરિઃ ।
વિસર્જયામાસ તતસ્તેન સખ્યં ચકાર સઃ ॥ ૫૯॥

રાવણઃ પરમપ્રીત એવં લોકાન્ મહાબલઃ ।
ચકાર સ્વવશે રામ બુભુજે સ્વયમેવ તાન્ ॥ ૬૦॥

એવમ્પ્રભાવો રાજેન્દ્ર દશગ્રીવઃ સહેન્દ્રજિત્ ।
ત્વયા વિનિહતઃ સઙ્ખ્યે રાવણો લોકરાવણઃ ॥ ૬૧॥

મેઘનાદશ્ચ નિહતો લક્ષ્મણેન મહાત્મના ।
કુમ્ભકર્ણશ્ચ નિહતસ્ત્વયા પર્વતસન્નિભઃ ॥ ૬૨॥

ભવાન્નારાયણઃ સાક્ષાજ્જગતામાદિકૃદ્વિભુઃ ।
ત્વત્સ્વરૂપમિદં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૬૩॥

ત્વન્નાભિકમલોત્પન્નો બ્રહ્મા લોકપિતામહઃ ।
અગ્નિસ્તે મુખતો જાતો વાચા સહ રઘૂત્તમ ॥ ૬૪॥

બાહુભ્યાં લોકપાલૌઘાશ્ચક્ષુર્ભ્યાં ચન્દ્રભાસ્કરૌ ।
દિશશ્ચ વિદિશશ્ચૈવ કર્ણાભ્યાં તે સમુત્થિતાઃ ॥ ૬૫॥

ઘ્રાણાત્પ્રાણઃ સમુત્પન્નશ્ચાશ્વિનૌ દેવસત્તમૌ ।
જઙ્ઘાજાનૂરુજઘનાદ્ભુવર્લોકાદયોઽભવન્ ॥ ૬૬॥

કુક્ષિદેશાત્સમુત્પન્નાશ્ચત્વારઃ સાગરા હરે ।
સ્તનાભ્યામિન્દ્રવરુણૌ વાલખિલ્યાશ્ચ રેતસઃ ॥ ૬૭॥

મેઢ્રાદ્યમો ગુદાન્મૃત્યુર્મન્યો રુદ્રસ્ત્રિલોચનઃ ।
અસ્થિભ્યઃ પર્વતા જાતાઃ કેશેભ્યો મેઘસંહતિઃ ॥ ૬૮॥

ઓષધ્યસ્તવ રોમેભ્યો નખેભ્યશ્ચ ખરાદયઃ ।
ત્વં વિશ્વરૂપઃ પુરુષો માયાશક્તિસમન્વિતઃ ॥ ૬૯॥

નાનારૂપ ઇવાભાસિ ગુણવ્યતિકરે સતિ ।
ત્વામાશ્રિત્યૈવ વિબુધાઃ પિબન્ત્યમૃતમધ્વરે ॥ ૭૦॥

ત્વયા સૃષ્ટમિદં સર્વં વિશ્વં સ્થાવરજઙ્ગમમ્ ।
ત્વામાશ્રિત્યૈવ જીવન્તિ સર્વે સ્થાવરજઙ્ગમાઃ ॥ ૭૧॥

ત્વદ્યુક્તમખિલં વસ્તુ વ્યવહારેઽપિ રાઘવ ।
ક્ષીરમધ્યગતં સર્પિર્યથા વ્યાપ્યાખિલં પયઃ ॥ ૭૨॥

ત્વદ્ભાસા ભાસતેઽર્કાદિ ન ત્વં તેનાવભાસસે ।
સર્વગં નિત્યમેકં ત્વાં જ્ઞાનચક્ષુર્વિલોકયેત્ ॥ ૭૩॥

નાજ્ઞાનચક્ષુસ્ત્વાં પશ્યેદન્ધદૃગ્ ભાસ્કરં યથા ।
યોગિનસ્ત્વાં વિચિન્વન્તિ સ્વદેહે પરમેશ્વરમ્ ॥ ૭૪॥

અતન્નિરસનમુખૈર્વેદશીર્ષૈરહર્નિશમ્ ।
ત્વત્પાદભક્તિલેશેન ગૃહીતા યદિ યોગિનઃ ॥ ૭૫॥

વિચિન્વન્તો હિ પશ્યન્તિ ચિન્માત્રં ત્વાં ન ચાન્યથા ।
મયા પ્રલપિતં કિઞ્ચિત્સર્વજ્ઞસ્ય તવાગ્રતઃ ।
ક્ષન્તુમર્હસિ દેવેશ તવાનુગ્રહભાગહમ્ ॥ ૭૬॥

દિગ્દેશકાલપરિહીનમનન્યમેકં
ચિન્માત્રમક્ષરમજં ચલનાદિહીનમ્ ।
સર્વજ્ઞમીશ્વરમનન્તગુણં વ્યુદસ્ત-
માયં ભજે રઘુપતિં ભજતામભિન્નમ્ ॥ ૭૭॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે ઉત્તરકાણ્ડે દ્વિતીયઃ
સર્ગઃ ॥ ૨॥

## ॥ તૃતીય સર્ગઃ ॥

શ્રીરામ ઉવાચ ।

વાલિસુગ્રીવયોર્જન્મ શ્રોતુમિચ્છામિ તત્ત્વતઃ ।
રવીન્દ્રૌ વાનરાકારૌ જજ્ઞાતાવિતિ નઃ શ્રુતમ્ ॥ ૧॥

અગસ્ત્ય ઉવાચ ।
મેરોઃ સ્વર્ણમયસ્યાદ્રેર્મધ્યશૃઙ્ગે મણિપ્રભે ।
તસ્મિન્ સભાઽઽસ્તે વિસ્તીર્ણા બ્રહ્મણઃ શતયોજના ॥ ૨॥

તસ્યાં ચતુર્મુખઃ સાક્ષાત્કદાચિદ્યોગમાસ્થિતઃ ।
નેત્રાભ્યાં પતિતં દિવ્યમાનન્દસલિલં બહુ ॥ ૩॥

તદ્ગૃહીત્વા કરે બ્રહ્મા ધ્યાત્વા કિઞ્ચિત્તદત્યજત્ ।
ભૂમૌ પતિતમાત્રેણ તસ્માજ્જાતો મહાકપિઃ ॥ ૪॥

તમાહ દ્રુહિણો વત્સ કિઞ્ચિત્કાલં વસાત્ર મે ।
સમીપે સર્વશોભાઢ્યે તતઃ શ્રેયો ભવિષ્યતિ ॥ ૫॥

ઇત્યુક્તો ન્યવસત્તત્ર બ્રહ્મણા વાનરોત્તમઃ ।

એવં બહુતિથે કાલે ગતે ઋક્ષાધિપઃ સુધીઃ ॥ ૬॥

કદાચિત્પર્યટન્નદ્રૌ ફલમૂલાર્થમુદ્યતઃ ।
અપશ્યદ્દિવ્યસલિલાં વાપીં મણિશિલાન્વિતામ્ ॥ ૭॥

પાનીયં પાતુમાગચ્છત્તત્ર છાયામયં કપિમ્ ।
દૃષ્ટ્વા પ્રતિકપિં મત્વા નિપપાત જલાન્તરે ॥ ૮॥

તત્રાદૃષ્ટ્વા હરિં શીઘ્રં પુનરુત્પ્લુત્ય વાનરઃ ।
અપશ્યત્સુન્દરીં રામામાત્માનં વિસ્મયં ગતઃ ॥ ૯॥

તતઃ સુરેશો દેવેશં પૂજયિત્વા ચતુર્મુખમ્ ।
ગચ્છન્ મધ્યાહ્નસમયે દૃષ્ટ્વા નારીં મનોરમામ્ ॥ ૧૦॥

કન્દર્પશરવિદ્ધાઙ્ગસ્ત્યક્તવાન્ વીર્યમુત્તમમ્ ।
તામપ્રાપ્યૈવ તદ્બીજં વાલદેશેઽપતદ્ભુવિ ॥ ૧૧॥

વાલી સમભવત્તત્ર શક્રતુલ્યપરાક્રમઃ ।
તસ્ય દત્ત્વા સુરેશાનઃ સ્વર્ણમાલાં દિવં ગતઃ ॥ ૧૨॥

ભાનુરપ્યાગતસ્તત્ર તદાનીમેવ ભામિનીમ્ ।
દૃષ્ટ્વા કામવશો ભૂત્વા  ગ્રીવાદેશેઽસૃજન્મહત્ ॥ ૧૩॥

બીજં તસ્યાસ્તતઃ સદ્યો મહાકાયોઽભવદ્ધરિઃ ।
તસ્ય દત્ત્વા હનૂમન્તં સહાયાર્થં ગતો રવિઃ ॥ ૧૪॥

પુત્રદ્વયં સમાદાય ગત્વા સા નિદ્રિતા ક્વચિત્ ।
પ્રભાતેઽપશ્યદાત્માનં પૂર્વવદ્વાનરાકૃતિમ્ ॥ ૧૫॥

ફલમૂલાદિભિઃ સાર્ધં પુત્રાભ્યાં સહિતઃ કપિઃ ।
નત્વા ચતુર્મુખસ્યાગ્રે ઋક્ષરાજઃ સ્થિતઃ સુધીઃ ॥ ૧૬॥

તતોઽબ્રવીત્સમાશ્વાસ્ય બહુશઃ કપિકુઞ્જરમ્ ।
તત્રૈકં દેવતાદૂતમાહૂયામરસન્નિભમ્ ॥ ૧૭॥

ગચ્છ દૂત મયાદિષ્ટો ગૃહીત્વા વાનરોત્તમમ્ ।
કિષ્કિન્ધાં દિવ્યનગરીં નિર્મિતાં વિશ્વકર્મણા ॥ ૧૮॥

સર્વસૌભાગ્યવલિતાં દેવૈરપિ દુરાસદામ્ ।
તસ્યાં સિંહાસને વીરં રાજાનમભિષેચય ॥ ૧૯॥

સપ્તદ્વીપગતા યે યે વાનરાઃ સન્તિ દુર્જયાઃ ।
સર્વે તે ઋક્ષરાજસ્ય ભવિષ્યન્તિ વશેઽનુગાઃ ॥ ૨૦॥

યદા નારાયણઃ સાક્ષાદ્રામો ભૂત્વા સનાતનઃ ।
ભૂભારાસુરનાશાય સમ્ભવિષ્યતિ ભૂતલે ॥ ૨૧॥

તદા સર્વે સહાયાર્થે તસ્ય ગચ્છન્તુ વાનરાઃ ।
ઇત્યુક્તો બ્રહ્મણા દૂતો દેવાનાં સ મહામતિઃ ॥ ૨૨॥

યથાઽઽજ્ઞપ્તસ્તથા ચક્રે બ્રહ્મણા તં હરીશ્વરમ્ ।
દેવદૂતસ્તતો ગત્વા બ્રહ્મણે તન્ન્યવેદયત્ ॥ ૨૩॥

તદાદિ વાનરાણાં સા કિષ્કિન્ધાઽભૂન્નૃપાશ્રયઃ ॥ ૨૪॥

સર્વેશ્વરસ્ત્વમેવાસીરિદાનીં બ્રહ્મણાર્થિતઃ ।
ભૂમેર્ભારો હૃતઃ કૃત્સ્નસ્ત્વયા લીલાનૃદેહિના ।
સર્વભૂતાન્તરસ્થસ્ય નિત્યમુક્તચિદાત્મનઃ ॥ ૨૫॥

અખણ્ડાનન્તરૂપસ્ય કિયાનેષ પરાક્રમઃ ।
તથાપિ વર્ણ્યતે સદ્ભિર્લીલામાનુષરૂપિણઃ ॥ ૨૬॥

યશસ્તે સર્વલોકાનાં પાપહત્યૈ સુખાય ચ ।
ય ઇદં કીર્તયેન્મર્ત્યો વાલિસુગ્રીવયોર્મહત્ ॥ ૨૭॥

જન્મ ત્વદાશ્રયત્વાત્સ મુચ્યતે સર્વપાતકૈઃ ॥ ૨૮॥

અથાન્યાં સમ્પ્રવક્ષ્યામિ કથાં રામ ત્વદાશ્રયામ્ ।
સીતા હૃતા યદર્થં સા રાવણેન દુરાત્મના ॥ ૨૯॥

પુરા કૃતયુગે રામ પ્રજાપતિસુતં વિભુમ્ ।
સનત્કુમારમેકાન્તે સમાસીનં દશાનનઃ ।
વિનયાવનતો ભૂત્વા હ્યભિવાદ્યેદમબ્રવીત્ ॥ ૩૦॥

કો ન્વસ્મિન્ પ્રવરો લોકે દેવાનાં બલવત્તરઃ ।
દેવાશ્ચ યં સમાશ્રિત્ય યુદ્ધે શત્રું જયન્તિ હિ ॥ ૩૧॥

કં યજન્તિ દ્વિજા નિત્યં કં ધ્યાયન્તિ ચ યોગિનઃ ।
એતન્મે શંસ ભગવન્ પ્રશ્નં પ્રશ્નવિદાંવર ॥ ૩૨॥

જ્ઞાત્વા તસ્ય હૃદિસ્થં યત્તદશેષેણ યોગદૃક્ ।
દશાનનમુવાચેદં શૃણુ વક્ષ્યામિ પુત્રક ॥ ૩૩॥

ભર્તા યો જગતાં નિત્યં યસ્ય જન્માદિકં ન હિ ।
સુરાસુરૈર્નુતો નિત્યં હરિર્નારાયણોઽવ્યયઃ ॥ ૩૪॥

યન્નાભિપઙ્કજાજ્જાતો બ્રહ્મા વિશ્વસૃજાં પતિઃ ।
સૃષ્ટં યેનૈવ સકલં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૩૫॥

તં સમાશ્રિત્ય વિબુધા જયન્તિ સમરે રિપૂન્ ।
યોગિનો ધ્યાનયોગેન તમેવાનુજપન્તિ હિ ॥ ૩૬॥

મહર્ષેર્વચનં શ્રુત્વા પ્રત્યુવાચ દશાનનઃ ।
દૈત્યદાનવરક્ષાંસિ વિષ્ણુના નિહતાનિ ચ ॥ ૩૭॥

કાં વા ગતિં પ્રપદ્યન્તે પ્રેત્ય તે મુનિપુઙ્ગવ ।
તમુવાચ મુનિશ્રેષ્ઠો રાવણં રાક્ષસાધિપમ્ ॥ ૩૮॥

દૈવતૈર્નિહતા નિત્યં ગત્વા સ્વર્ગમનુત્તમમ્ ।
ભોગક્ષયે પુનસ્તસ્માદ્ભ્રષ્ટા ભૂમૌ ભવન્તિ તે ॥ ૩૯॥

પૂર્વાર્જિતૈઃ પુણ્યપાપૈર્મ્રિયન્તે ચોદ્ભવન્તિ ચ ।
વિષ્ણુના યે હતાસ્તે તુ પ્રાપ્નુવન્તિ હરેર્ગતિમ્ ॥ ૪૦॥

શ્રુત્વા મુનિમુખાત્સર્વં રાવણો હૃષ્ટમાનસઃ ।
યોત્સ્યેઽહં હરિણા સાર્ધમિતિ ચિન્તાપરોઽભવત્ ॥ ૪૧॥

મનઃસ્થિતં પરિજ્ઞાય રાવણસ્ય મહામુનિઃ ।
ઉવાચ વત્સ તેઽભીષ્ટં ભવિષ્યતિ ન સંશયઃ ॥ ૪૨॥

કઞ્ચિત્કાલં પ્રતીક્ષસ્વ સુખી ભવ દશાનન ।
એવમુક્ત્વા મહાબાહો મુનિઃ પુનરુવાચ તમ્ ॥ ૪૩॥

તસ્ય સ્વરૂપં વક્ષ્યામિ હ્યરૂપસ્યાપિ માયિનઃ ।
સ્થાવરેષુ ચ સર્વેષુ નદેષુ ચ નદીષુ ચ ॥ ૪૪॥

ઓઙ્કારશ્ચૈવ સત્યં ચ સાવિત્રી પૃથિવી ચ સઃ ।
સમસ્તજગદાધારઃ શેષરૂપધરો હિ સઃ ॥ ૪૫॥

સર્વે દેવાઃ સમુદ્રાશ્ચ કાલઃ સૂર્યશ્ચ ચન્દ્રમાઃ ।
સૂર્યોદયો દિવારાત્રી યમશ્ચૈવ તથાનિલઃ ॥ ૪૬॥

અગ્નિરિન્દ્રસ્તથા મૃત્યુઃ પર્જન્યો વસવસ્તથા ।

બ્રહ્મા રુદ્રાદયશ્ચૈવ યે ચાન્યે દેવદાનવાઃ ॥ ૪૭॥

વિદ્યોતતે જ્વલત્યેષ પાતિ ચાત્તીતિ વિશ્વકૃત્ ।
ક્રીડાં કરોત્યવ્યયાત્મા સોઽયં વિષ્ણુઃ સનાતનઃ ॥ ૪૮॥

તેન સર્વમિદં વ્યાપ્તં ત્રૈલોક્યં સચરાચરમ્ ।
નીલોત્પલદલશ્યામો વિદ્યુદ્વર્ણામ્બરાવૃતઃ ॥ ૪૯॥

શુદ્ધજામ્બૂનદપ્રખ્યાં શ્રિયં વામાઙ્કસંસ્થિતામ્ ।
સદાનપાયિનીં દેવીં પશ્યન્નાલિઙ્ગ્ય તિષ્ઠતિ ॥ ૫૦॥

દ્રષ્ટું ન શક્યતે કૈશ્ચિદ્દેવદાનવપન્નગૈઃ ।
યસ્ય પ્રસાદં કુરુતે સ ચૈનં દ્રષ્ટુમર્હતિ ॥ ૫૧॥

ન ચ યજ્ઞતપોભિર્વા ન દાનાધ્યયનાદિભિઃ ।
શક્યતે ભગવાન્ દ્રષ્ટુમુપાયૈરિતરૈરપિ ॥ ૫૨॥

તદ્ભક્તૈસ્તદ્ગતપ્રાણૈસ્તચ્ચિત્તૈર્ધૂતકલ્મષૈઃ ।
શક્યતે ભગવાન્ વિષ્ણુર્વેદાન્તામલદૃષ્ટિભિઃ ॥ ૫૩॥

અથવા દ્રષ્ટુમિચ્છા તે શૃણુ ત્વં પરમેશ્વરમ્ ।
ત્રેતાયુગે સ દેવેશો ભવિતા નૃપવિગ્રહઃ ॥ ૫૪॥

હિતાર્થં દેવમર્ત્યાનામિક્ષ્વાકૂણાં કુલે હરિઃ ।
રામો દાશરથિર્ભૂત્વા મહાસત્ત્વપરાક્રમઃ ॥ ૫૫॥

પિતુર્નિયોગાત્સ ભ્રાત્રા ભાર્યયા દણ્ડકે વને ।
વિચરિષ્યતિ ધર્માત્મા જગન્માત્રા સ્વમાયયા ॥ ૫૬॥

એવં તે સર્વમાખ્યાતં મયા રાવણ વિસ્તરાત્ ।
ભજસ્વ ભક્તિભાવેન સદા રામં શ્રિયા યુતમ્ ॥ ૫૭॥

અગસ્ત્ય ઉવાચ ।
એવં શ્રુત્વાસુરાધ્યક્ષો ધ્યાત્વા કિઞ્ચિદ્વિચાર્ય ચ ।
ત્વયા સહ વિરોધેપ્સુર્મુમુદે રાવણો મહાન્ ॥ ૫૮॥

યુદ્ધાર્થી સર્વતો લોકાન્ પર્યટન્ સમવસ્થિતઃ ।
એતદર્થં મહારાજ રાવણોઽતીવ બુદ્ધિમાન્ ।
હૃતવાન્ જાનકીં દેવીં ત્વયાત્મવધકાઙ્ક્ષયા ॥ ૫૯॥

ઇમાં કથાં યઃ શૃણુયાત્પઠેદ્વા

સંશ્રાવયેદ્વા શ્રવણાર્થિનાં સદા ।
આયુષ્યમારોગ્યમનન્તસૌખ્યં
પ્રાપ્નોતિ લાભં ધનમક્ષયં ચ ॥ ૬૦॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે ઉત્તરકાણ્ડે
તૃતીયઃ સર્ગઃ ॥ ૩॥

## ॥ ચતુર્થ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।

એકદા બ્રહ્મણો લોકાદાયાન્તં નારદં મુનિમ્ ।
પર્યટન્ રાવણો લોકાન્ દૃષ્ટ્વા નત્વાબ્રવીદ્વચઃ ॥ ૧॥

ભગવન્ બ્રૂહિ મે યોદ્ધું કુત્ર સન્તિ મહાબલાઃ ।
યોદ્ધુમિચ્છામિ બલિભિસ્ત્વં જ્ઞાતાસિ જગત્ત્રયમ્ ॥ ૨॥

મુનિર્ધ્યાઽઽત્વાહ સુચિરં શ્વેતદ્વીપનિવાસિનઃ ।
મહાબલા મહાકાયાસ્તત્ર યાહિ મહામતે ॥ ૩॥

વિષ્ણુપૂજારતા યે વૈ વિષ્ણુના નિહતાશ્ચ યે ।
ત એવ તત્ર સઞ્જાતા અજેયાશ્ચ સુરાસુરૈઃ ॥ ૪॥

શ્રુત્વા તદ્રાવણો વેગાન્મન્ત્રિભિઃ પુષ્પકેણ તાન્ ।
યોદ્ધુકામઃ સમાગત્ય શ્વેતદ્વીપસમીપતઃ ॥ ૫॥

તત્પ્રભાહતતેજસ્કં પુષ્પકં નાચલત્તતઃ ।
ત્યક્ત્વા વિમાનં પ્રયયૌ મન્ત્રિણશ્ચ દશાનનઃ ॥ ૬॥

પ્રવિશન્નેવ તદ્ દ્વીપં ધૃતો હસ્તેન યોષિતા ।
પૃષ્ટશ્ચ ત્વં કુતઃ કોઽસિ પ્રેષિતઃ કેન વા વદ ॥ ૭॥

ઇત્યુક્તો લીલયા સ્ત્રીભિર્હસન્તીભિઃ પુનઃ પુનઃ ।
કૃચ્છ્રાદ્ધસ્તાદ્વિનિર્મુક્તસ્તાસાં સ્ત્રીણાં દશાનનઃ ॥ ૮॥

આશ્ચર્યમતુલં લબ્ધ્વા ચિન્તયામાસ દુર્મતિઃ ।
વિષ્ણુના નિહતો યામિ વૈકુણ્ઠમિતિ નિશ્ચિતઃ ॥ ૯॥

મયિ વિષ્ણુર્યથા કુપ્યેત્તથા કાર્યં કરોમ્યહમ્ ।
ઇતિ નિશ્ચિત્ય વૈદેહીં જહાર વિપિનેઽસુરઃ ॥ ૧૦॥

જાનન્નેવ પરાત્માનં સ જહારાવનીસુતામ્ ।
માતૃવત્પાલયામાસ ત્વત્તઃ કાઙ્ક્ષન્ વધં સ્વકમ્ ॥ ૧૧॥

રામ ત્વં પરમેશ્વરોઽસિ સકલં જાનાસિ વિજ્ઞાનદૃગ્
ભૂતં ભવ્યમિદં ત્રિકાલકલનાસાક્ષી વિકલ્પોજ્ઝિતઃ ।
ભક્તાનામનુવર્તનાય સકલાં કુર્વન્ ક્રિયાસંહતિં
ત્વં શૃણ્વન્મનુજાકૃતિર્મુનિવચો ભાસીશ લોકાર્ચિતઃ ॥ ૧૨॥

સ્તુત્વૈવં રાઘવં તેન પૂજિતઃ કુમ્ભસમ્ભવઃ ।
સ્વાશ્રમં મુનિભિઃ સાર્ધં પ્રયયૌ હૃષ્ટમાનસઃ ॥ ૧૩॥

રામસ્તુ સીતયા સાર્ધં ભ્રાતૃભિઃ સહ મન્ત્રિભિઃ ।
સંસારીવ રમાનાથો રમમાણોઽવસદ્ગૃહે ॥ ૧૪॥

અનાસક્તોઽપિ વિષયાન્ બુભુજે પ્રિયયા સહ ।
હનુમત્પ્રમુખૈઃ સદ્ભિર્વાનરૈઃ પરિવેષ્ટિતઃ ॥ ૧૫॥

પુષ્પકં ચાગમદ્રામમેકદા પૂર્વવત્પ્રભુમ્ ।
પ્રાહ દેવ કુબેરેણ પ્રેષિતં ત્વામહં તતઃ ॥ ૧૬॥

જિતં ત્વં રાવણેનાદૌ પશ્ચાદ્રામેણ નિર્જિતમ્ ।
અતસ્ત્વં રાઘવં નિત્યં વહ યાવદ્વસેદ્ભુવિ ॥ ૧૭॥

યદા ગચ્છેદ્રઘુશ્રેષ્ઠો વૈકુણ્ઠં યાહિ માં તદા ।
તચ્છ્રુત્વા રાઘવઃ પ્રાહ પુષ્પકં સૂર્યસન્નિભમ્ ॥ ૧૮॥

યદા સ્મરામિ ભદ્રં તે તદાગચ્છ મમાન્તિકમ્ ।
તિષ્ઠાન્તર્ધાય સર્વત્ર ગચ્છેદાનીં મમાજ્ઞયા ॥ ૧૯॥

ઇત્યુક્ત્વા રામચન્દ્રોઽપિ પૌરકાર્યાણિ સર્વશઃ ।
ભ્રાતૃભિર્મન્ત્રિભિઃ સાર્ધં યથાન્યાયં ચકાર સઃ ॥ ૨૦॥

રાઘવે શાસતિ ભુવં લોકનાથે રમાપતૌ ।
વસુધા સસ્યસમ્પન્ના ફલવન્તશ્ચ ભૂરુહાઃ ॥ ૨૧॥

જના ધર્મપરાઃ સર્વે પતિભક્તિપરાઃ સ્ત્રિયઃ ।
નાપશ્યત્પુત્રમરણં કશ્ચિદ્રાજનિ રાઘવે ॥ ૨૨॥

સમારુહ્ય વિમાનાગ્ર્યં રાઘવઃ સીતયા સહ ।
વાનરૈર્ભ્રાતૃભિઃ સાર્ધં સઞ્ચચારાવનિં પ્રભુઃ ॥ ૨૩॥

અમાનુષાણિ કાર્યાણિ ચકાર બહુશો ભુવિ ।
બ્રાહ્મણસ્ય સુતં દૃષ્ટ્વા બાલં મૃતમકાલતઃ ॥ ૨૪॥

શોચન્તં બ્રાહ્મણં ચાપિ જ્ઞાત્વા રામો મહામતિઃ ।
તપસ્યન્તં વને શૂદ્રં હત્વા બ્રાહ્મણબાલકમ્ ॥ ૨૫॥

જીવયામાસ શૂદ્રસ્ય દદૌ સ્વર્ગમનુત્તમમ્ ।
લોકાનામુપદેશાર્થં પરમાત્મા રઘૂત્તમઃ ॥ ૨૬॥

કોટિશઃ સ્થાપયામાસ શિવલિઙ્ગાનિ સર્વશઃ ।
સીતાં ચ રમયામાસ સર્વભોગૈરમાનુષૈઃ ॥ ૨૭॥

શશાસ રામો ધર્મેણ રાજ્યં પરમધર્મવિત્ ।
કથાં સંસ્થાપયામાસ સર્વલોકમલાપહામ્ ॥ ૨૮॥

દશવર્ષસહસ્રાણિ માયામાનુષવિગ્રહઃ ।
ચકાર રાજ્યં વિધિવલ્લોકવન્દ્યપદામ્બુજઃ ॥ ૨૯॥

એકપત્નીવ્રતો રામો રાજર્ષિઃ સર્વદા શુચિઃ ।
ગૃહમેધીયમખિલમાચરન્ શિક્ષયન્ જનાન્ ॥ ૩૦॥

સીતા પ્રેમ્ણાનુવૃત્ત્યા ચ પ્રશ્રયેણ દમેન ચ ।
ભર્તુર્મનોહરા સાધ્વી ભાવજ્ઞા સા હ્રિયા ભિયા ॥ ૩૧॥

એકદાક્રીડવિપિને સર્વભોગસમન્વિતે ।
એકાન્તે દિવ્યભવને સુખાસીનં રઘૂત્તમમ્ ॥ ૩૨॥

નીલમાણિક્યસઙ્કાશં દિવ્યાભરણભૂષિતમ્ ।
પ્રસન્નવદનં શાન્તં વિદ્યુત્પુઞ્જનિભામ્બરમ્ ॥ ૩૩॥

સીતા કમલપત્રાક્ષી સર્વાભરણભૂષિતા ।
રામમાહ કરાભ્યાં સા લાલયન્તી પદામ્બુજે ॥ ૩૪॥

દેવદેવ જગન્નાથ પરમાત્મન્ સનાતન ।
ચિદાનન્દાદિમધ્યાન્તરહિતાશેષકારણ ॥ ૩૫॥

દેવ દેવાઃ સમાસાદ્ય મામેકાન્તેઽબ્રુવન્વચઃ ।
બહુશોઽર્થ્યમાનાસ્તે વૈકુણ્ઠાગમનં પ્રતિ ॥ ૩૬॥

ત્વયા સમેતશ્ચિચ્છક્ત્યા રામસ્તિષ્ઠતિ ભૂતલે ।
વિસૃજ્યાસ્માન્ સ્વકં ધામ વૈકુણ્ઠં ચ સનાતનમ્ ॥ ૩૭॥

આસ્તે ત્વયા જગદ્ધાત્રિ રામઃ કમલલોચનઃ ।
અગ્રતો યાહિ વૈકુણ્ઠં ત્વં તથા ચેદ્રઘૂત્તમઃ ॥ ૩૮॥

આગમિષ્યતિ વૈકુણ્ઠં સનાથાન્નઃ કરિષ્યતિ ।
ઇતિ વિજ્ઞાપિતાહં તૈર્મયા વિજ્ઞાપિતો ભવાન્ ॥ ૩૯॥

યદ્યુક્તં તત્કુરુષ્વાદ્ય નાહમાજ્ઞાપયે પ્રભો ।
સીતાયાસ્તદ્વચઃ શ્રુત્વા રામો ધ્યાત્વાબ્રવીત્ક્ષણમ્ ॥ ૪૦॥

દેવિ જાનામિ સકલં તત્રોપાયં વદામિ તે ।
કલ્પયિત્વા મિષં દેવિ લોકવાદં ત્વદાશયમ્ ॥ ૪૧॥

ત્યજામિ ત્વાં વને લોકવાદાદ્ભીત ઇવાપરઃ ।
ભવિષ્યતઃ કુમારૌ દ્વૌ વાલ્મીકેરાશ્રમાન્તિકે ॥ ૪૨॥

ઇદાનીં દૃશ્યતે ગર્ભઃ પુનરાગત્ય મેઽન્તિકમ્ ।
લોકાનાં પ્રત્યયાર્થં ત્વં કૃત્વા શપથમાદરાત્ ॥ ૪૩॥

ભૂમેર્વિવરમાત્રેણ વૈકુણ્ઠં યાસ્યસિ દ્રુતમ્ ।
પશ્ચાદહં ગમિષ્યામિ એષ એવ સુનિશ્ચયઃ ॥ ૪૪॥

ઇત્યુક્ત્વા તાં વિસૃજ્યાથ રામો જ્ઞાનૈકલક્ષણઃ ।
મન્ત્રિભિર્મન્ત્રતત્ત્વજ્ઞૈર્બલમુખ્યૈશ્ચ સંવૃતઃ ॥ ૪૫॥

તત્રોપવિષ્ટં શ્રીરામં સુહૃદઃ પર્યુપાસત ।
હાસ્યપ્રૌઢકથાસુજ્ઞા હાસયન્તઃ સ્થિતા હરિમ્ ॥ ૪૬॥

કથાપ્રસઙ્ગાત્પપ્રચ્છ રામો વિજયનામકમ્ ।
પૌરા જાનપદા મે કિં વદન્તીહ શુભાશુભમ્ ॥ ૪૭॥

સીતાં વા માતરં વા મે ભ્રાતૄન્વા કૈકયીમથ ।
ન ભેતવ્યં ત્વયા બ્રૂહિ શાપિતોઽસિ મમોપરિ ॥ ૪૮॥

ઇત્યુક્તઃ પ્રાહ વિજયો દેવ સર્વે વદન્તિ તે ।
કૃતં સુદુષ્કરં સર્વં રામેણ વિદિતાત્મના ॥ ૪૯॥

કિન્તુ હત્વા દશગ્રીવં સીતામાહૃત્ય રાઘવઃ ।

અમર્ષં પૃષ્ઠતઃ કૃત્વા સ્વં વેશ્મ પ્રત્યપાદયત્ ॥ ૫૦॥

કીદૃશં હૃદયે તસ્ય સીતાસમ્ભોગજં સુખમ્ ।
યા હૃતા વિજનેઽરણ્યે રાવણેન દુરાત્મના ॥ ૫૧॥

અસ્માકમપિ દુષ્કર્મ યોષિતાં મર્ષણં ભવેત્ ।
યાદૃગ્ભવતિ વૈ રાજા તાદૃશ્યો નિયતં પ્રજાઃ ॥ ૫૨॥

શ્રુત્વા તદ્વચનં રામઃ સ્વજનાન્ પર્યપૃચ્છત ।
તેઽપિ નત્વાબ્રુવન્ રામમેવમેતન્ન સંશયઃ ॥ ૫૩॥

તતો વિસૃજ્ય સચિવાન્ વિજયં સુહૃદસ્તથા ।
આહૂય લક્ષ્મણં રામો વચનં ચેદમબ્રવીત્ ॥ ૫૪॥

લોકાપવાદસ્તુ મહાન્ સીતામાશ્રિત્ય મેઽભવત્ ।
સીતાં પ્રાતઃ સમાનીય વાલ્મીકેરાશ્રમાન્તિકે ॥ ૫૫॥

ત્યક્ત્વા શીઘ્રં રથેન ત્વં પુનરાયાહિ લક્ષ્મણ ।
વક્ષ્યસે યદિ વા કિઞ્ચિત્તદા માં હતવાનસિ ॥ ૫૬॥

ઇત્યુક્તો લક્ષ્મણો ભીત્યા પ્રાતરુત્થાય જાનકીમ્ ।
સુમન્ત્રેણ રથે કૃત્વા જગામ સહસા વનમ્ ॥ ૫૭॥

વાલ્મીકેરાશ્રમસ્યાન્તે ત્યક્ત્વા સીતામુવાચ સઃ ।
લોકાપવાદભીત્યા ત્વાં ત્યક્તવાન્ રાઘવો વને ॥ ૫૮॥

દોષો ન કશ્ચિન્મે માતર્ગચ્છાશ્રમપદં મુનેઃ ।
ઇત્યુક્ત્વા લક્ષ્મણઃ શીઘ્રં ગતવાન્ રામસન્નિધિમ્ ॥ ૫૯॥

સીતાપિ દુઃખસન્તપ્તા વિલલાપાતિમુગ્ધવત્ ।
શિષ્યૈઃ શ્રુત્વા ચ વાલ્મીકિઃ સીતાં જ્ઞાત્વા સ દિવ્યદૃક્ ॥ ૬૦॥

અર્ઘ્યાદિભિઃ પૂજયિત્વા સમાશ્વાસ્ય ચ જાનકીમ્ ।
જ્ઞાત્વા ભવિષ્યં સકલમાર્પયન્ મુનિયોષિતામ્ ॥ ૬૧॥

તાસ્તાં સમ્પૂજયન્તિ સ્મ સીતાં ભક્ત્યા દિને દિને ।
જ્ઞાત્વા પરાત્મનો લક્ષ્મીં મુનિવાક્યેન યોષિતઃ ।
સેવાં ચક્રુઃ સદા તસ્યા વિનયાદિભિરાદરાત્ ॥ ૬૨॥

રામોઽપિ સીતારહિતઃ પરાત્મા વિજ્ઞાનદૃક્કેવલ આદિદેવઃ ।
સન્ત્યજ્ય ભોગાનખિલાન્ વિરક્તો મુનિવ્રતોઽભૂન્મુનિસેવિતાઙ્ઘ્રિઃ ॥ ૬૩॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે ઉત્તરકાણ્ડે
ચતુર્થઃ સર્ગઃ ॥ ૪॥

## ॥ પઞ્ચમ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।

તતો જગન્મઙ્ગલમઙ્ગલાત્મના
 વિધાય રામાયણકીર્તિમુત્તમામ્ ।
ચચાર પૂર્વાચરિતં રઘૂત્તમો
 રાજર્ષિવર્યૈરભિસેવિતં યથા ॥ ૧॥

સૌમિત્રિણા પૃષ્ટ ઉદારબુદ્ધિના
 રામઃ કથાઃ પ્રાહ પુરાતનીઃ શુભાઃ ।
રાજ્ઞઃ પ્રમત્તસ્ય નૃગસ્ય શાપતો
 દ્વિજસ્ય તિર્યક્ત્વમથાહ રાઘવઃ ॥ ૨॥

કદાચિદેકાન્ત ઉપસ્થિતં પ્રભું
 રામં રમાલાલિતપાદપઙ્કજમ્ ।
સૌમિત્રિરાસાદિતશુદ્ધભાવનઃ
 પ્રણમ્ય ભક્ત્યા વિનયાન્વિતોઽબ્રવીત્ ॥ ૩॥

ત્વં શુદ્ધબોધોઽસિ હિ સર્વદેહિના-
 માત્માસ્યધીશોઽસિ નિરાકૃતિઃ સ્વયમ્ ।
પ્રતીયસે જ્ઞાનદૃશાં મહામતે
 પાદાબ્જભૃઙ્ગાહિતસઙ્ગસઙ્ગિનામ્ ॥ ૪॥

અહં પ્રપન્નોઽસ્મિ પદામ્બુજં પ્રભો
 ભવાપવર્ગં તવ યોગિભાવિતમ્ ।
યથાઞ્જસાઽજ્ઞાનમપારવારિધિં
 સુખં તરિષ્યામિ તથાનુશાધિ મામ્ ॥ ૫॥

શ્રુત્વાથ સૌમિત્રિવચોઽખિલં તદા
 પ્રાહ પ્રપન્નાર્તિહરઃ પ્રસન્નધીઃ ।

વિજ્ઞાનમજ્ઞાનતમઃપ્રશાન્તયે
  શ્રુતિપ્રપન્નં ક્ષિતિપાલભૂષણઃ ॥ ૬॥

આદૌ સ્વવર્ણાશ્રમવર્ણિતાઃ ક્રિયાઃ
  કૃત્વા સમાસાદિતશુદ્ધમાનસઃ ।
સમાપ્ય તત્પૂર્વમુપાત્તસાધનઃ
  સમાશ્રયેત્સદ્ગુરુમાત્મલબ્ધયે ॥ ૭॥

ક્રિયા શરીરોદ્ભવહેતુરાદૃતા
  પ્રિયાપ્રિયૌ તૌ ભવતઃ સુરાગિણઃ ।
ધર્મેતરૌ તત્ર પુનઃ શરીરકં
  પુનઃ ક્રિયા ચક્રવદીર્યતે ભવઃ ॥  ૮॥

અજ્ઞાનમેવાસ્ય હિ મૂલકારણં
  તદ્ધ્યાનમેવાત્ર વિધૌ વિધીયતે ।
વિદ્યૈવ તન્નાશવિધૌ પટીયસી
  ન કર્મ તજ્જં સવિરોધમીરિતમ્ ॥ ૯॥

નાજ્ઞાનહાનિર્ન ચ રાગસઙ્ક્ષયો
  ભવેત્તતઃ કર્મ સદોષમુદ્ભવેત્ ।
તતઃ પુનઃ સંસૃતિરપ્યવારિતા
  તસ્માદ્બુધો જ્ઞાનવિચારવાન્ ભવેત્ ॥ ૧૦॥

નનુ ક્રિયા વેદમુખેન ચોદિતા
  તથૈવ વિદ્યા પુરુષાર્થસાધનમ્ ।
કર્તવ્યતા પ્રાણભૃતઃ પ્રચોદિતા
  વિદ્યાસહાયત્વમુપૈતિ સા પુનઃ ॥ ૧૧॥

કર્માકૃતૌ દોષમપિ શ્રુતિર્જગૌ
  તસ્માત્સદા કાર્યમિદં મુમુક્ષુણા ।
નનુ સ્વતન્ત્રા ધ્રુવકાર્યકારિણી
  વિદ્યા ન કિઞ્ચિન્મનસાપ્યપેક્ષતે ॥ ૧૨॥

ન સત્યકાર્યોઽપિ હિ યદ્વદધ્વરઃ
  પ્રકાઙ્ક્ષતેઽન્યાનપિ કારકાદિકાન્ ।
તથૈવ વિદ્યા વિધિતઃ પ્રકાશિતૈઃ
  વિશિષ્યતે કર્મભિરેવ મુક્તયે ॥ ૧૩॥

કેચિદ્વદન્તીતિ વિતર્કવાદિન-
    સ્તદપ્યસદ્દૃષ્ટવિરોધકારણાત્ ।
દેહાભિમાનાદભિવર્ધતે ક્રિયા
    વિદ્યા ગતાહઙ્કૃતિતઃ પ્રસિદ્ધ્યતિ ॥ ૧૪॥

વિશુદ્ધવિજ્ઞાનવિરોચનાઞ્ચિતા
    વિદ્યાત્મવૃત્તિશ્ચરમેતિ ભણ્યતે ।
ઉદેતિ કર્માખિલકારકાદિભિઃ
    નિહન્તિ વિદ્યાખિલકારકાદિકમ્ ॥ ૧૫॥

તસ્માત્ત્યજેત્કાર્યમશેષતઃ સુધીઃ
    વિદ્યાવિરોધાન્ન સમુચ્ચયો ભવેત્ ।
આત્માનુસન્ધાનપરાયણઃ સદા
    નિવૃત્તસર્વેન્દ્રિયવૃત્તિગોચરઃ ॥ ૧૬॥

યાવચ્છરીરાદિષુ માયયાત્મધી-
    સ્તાવદ્વિધેયો વિધિવાદકર્મણામ્ ।
નેતીતિ વાક્યૈરખિલં નિષિધ્ય તત્
    જ્ઞાત્વા પરાત્માનમથ ત્યજેત્ક્રિયાઃ ॥ ૧૭॥

યદા પરાત્માત્મવિભેદભેદકં
    વિજ્ઞાનમાત્મન્યવભાતિ ભાસ્વરમ્ ।
તદૈવ માયા પ્રવિલીયતેઽઞ્જસા
    સકારકા કારણમાત્મસંસૃતેઃ ॥ ૧૮॥

શ્રુતિપ્રમાણાભિવિનાશિતા ચ સા
    કથં ભવિષ્યત્યપિ કાર્યકારિણી ।
વિજ્ઞાનમાત્રાદમલાદ્વિતીયત-
    સ્તસ્માદવિદ્યા ન પુનર્ભવિષ્યતિ ॥ ૧૯॥

યદિ સ્મ નષ્ટા ન પુનઃ પ્રસૂયતે
    કર્તાહમસ્યેતિ મતિઃ કથં ભવેત્ ।
તસ્માત્સ્વતન્ત્રા ન કિમપ્યપેક્ષતે
    વિદ્યા વિમોક્ષાય વિભાતિ કેવલા ॥ ૨૦॥

સા તૈત્તિરીયશ્રુતિરાહ સાદરં

ન્યાસં પ્રશસ્તાખિલકર્મણાં સ્ફુટમ્ ।
એતાવદિત્યાહ ચ વાજિનાં શ્રુતિઃ
જ્ઞાનં વિમોક્ષાય ન કર્મ સાધનમ્ ॥ ૨૧॥

વિદ્યાસમત્વેન તુ દર્શિતસ્ત્વયા
ક્રતુર્ન દૃષ્ટાન્ત ઉદાહૃતઃ સમઃ ।
ફલૈઃ પૃથક્ત્વાદ્બહુકારકૈઃ ક્રતુઃ
સંસાધ્યતે જ્ઞાનમતો વિપર્યયમ્ ॥ ૨૨॥

સપ્રત્યવાયો હ્યહમિત્યનાત્મધી-
રજ્ઞપ્રસિદ્ધા ન તુ તત્ત્વદર્શિનઃ ।
તસ્માદ્બુધૈસ્ત્યાજ્યમવિક્રિયાત્મભિઃ
વિધાનતઃ કર્મ વિધિપ્રકાશિતમ્ ॥ ૨૩॥

શ્રદ્ધાન્વિતસ્તત્ત્વમસીતિ વાક્યતો
ગુરોઃ પ્રસાદાદપિ શુદ્ધમાનસઃ ।
વિજ્ઞાય ચૈકાત્મ્યમથાત્મજીવયોઃ
સુખી ભવેન્મેરુરિવાપ્રકમ્પનઃ ॥ ૨૪॥

આદૌ પદાર્થાવગતિર્હિ કારણં
વાક્યાર્થવિજ્ઞાનવિધૌ વિધાનતઃ ।
તત્ત્વમ્પદાર્થૌ પરમાત્મજીવકા-
વસીતિ ચૈકાત્મ્યમથાનયોર્ભવેત્ ॥ ૨૫॥

પ્રત્યક્પરોક્ષાદિવિરોધમાત્મનોઃ
વિહાય સઙ્ગૃહ્ય તયોશ્ચિદાત્મતામ્ ।
સંશોધિતાં લક્ષણયા ચ લક્ષિતાં
જ્ઞાત્વા સ્વમાત્માનમથાદ્વયો ભવેત્ ॥ ૨૬॥

એકાત્મકત્વાજ્જહતી ન સમ્ભવેત્
તથાઽજહલ્લક્ષણતા વિરોધતઃ ।
સોઽયમ્પદાર્થાવિવ ભાગલક્ષણા
યુજ્યેત તત્ત્વમ્પદયોરદોષતઃ ॥ ૨૭॥

રસાદિપઞ્ચીકૃતભૂતસમ્ભવં
ભોગાલયં દુઃખસુખાદિકર્મણામ્ ।
શરીરમાદ્યન્તવદાદિકર્મજં

માયામયં સ્થૂલમુપાધિમાત્મનઃ ॥ ૨૮॥

સૂક્ષ્મં મનોબુદ્ધિદશેન્દ્રિયૈર્યુતં
પ્રાણૈરપઞ્ચીકૃતભૂતસમ્ભવમ્ ।
ભોક્તુઃ સુખાદેરનુસાધનં ભવેત્
શરીરમન્યદ્વિદુરાત્મનો બુધાઃ ॥ ૨૯॥

અનાદ્યનિર્વાચ્યમપીહ કારણં
માયાપ્રધાનં તુ પરં શરીરકમ્ ।
ઉપાધિભેદાત્તુ યતઃ પૃથક્ સ્થિતં
સ્વાત્માનમાત્મન્યવધારયેત્ક્રમાત્ ॥ ૩૦॥

કોશેષ્વયં તેષુ તુ તત્તદાકૃતિઃ
વિભાતિ સઙ્ગાત્ સ્ફટિકોપલો યથા ।
અસઙ્ગરૂપોઽયમજો યતોઽદ્વયો
વિજ્ઞાયતેઽસ્મિન્ પરિતો વિચારિતે ॥ ૩૧॥

બુદ્ધેસ્ત્રિધા વૃત્તિરપીહ દૃશ્યતે
સ્વપ્નાદિભેદેન ગુણત્રયાત્મનઃ ।
અન્યોન્યતોઽસ્મિન્ વ્યભિચારતો મૃષા
નિત્યે પરે બ્રહ્મણિ કેવલે શિવે ॥ ૩૨॥

દેહેન્દ્રિયપ્રાણમનશ્ચિદાત્મનાં
સઙ્ઘાદજસ્રં પરિવર્તતે ધિયઃ ।
વૃત્તિસ્તમોમૂલતયાજ્ઞલક્ષણા
યાવદ્ભવેત્તાવદસૌ ભવોદ્ભવઃ ॥ ૩૩॥

નેતિપ્રમાણેન નિરાકૃતાખિલો
હૃદા સમાસ્વાદિતચિદ્ઘનામૃતઃ ।
ત્યજેદશેષં જગદાત્તસદ્રસં
પીત્વા યથામ્ભઃ પ્રજહાતિ તત્ફલમ્ ॥ ૩૪॥

કદાચિદાત્મા ન મૃતો ન જાયતે
ન ક્ષીયતે નાપિ વિવર્ધતેઽનવઃ ।
નિરસ્તસર્વાતિશયઃ સુખાત્મકઃ
સ્વયમ્પ્રભઃ સર્વગતોઽયમદ્વયઃ ॥ ૩૫॥

એવંવિધે જ્ઞાનમયે સુખાત્મકે
　　કથં ભવો દુઃખમયઃ પ્રતીયતે ।
અજ્ઞાનતોઽધ્યાસવશાત્પ્રકાશતે
　　જ્ઞાને વિલીયેત વિરોધતઃ ક્ષણાત્ ॥ ૩૬॥

યદન્યદન્યત્ર વિભાવ્યતે ભ્રમા-
　　દધ્યાસમિત્યાહુરમું વિપશ્ચિતઃ ।
અસર્પભૂતેઽહિવિભાવનં યથા
　　રજ્જ્વાદિકે તદ્વદપીશ્વરે જગત્ ॥ ૩૭॥

વિકલ્પમાયારહિતે ચિદાત્મકે-
　　ઽહઙ્કાર એષ પ્રથમઃ પ્રકલ્પિતઃ ।
અધ્યાસ એવાત્મનિ સર્વકારણે
　　નિરામયે બ્રહ્મણિ કેવલે પરે ॥ ૩૮॥

ઇચ્છાદિરાગાદિસુખાદિધર્મિકાઃ
　　સદા ધિયઃ સંસૃતિહેતવઃ પરે ।
યસ્માત્પ્રસુપ્તૌ તદભાવતઃ પરઃ
　　સુખસ્વરૂપેણ વિભાવ્યતે હિ નઃ ॥ ૩૯॥

અનાદ્યવિદ્યોદ્ભવબુદ્ધિબિમ્બિતો
　　જીવઃ પ્રકાશોઽયમિતીર્યતે ચિતઃ ।
આત્મા ધિયઃ સાક્ષિતયા પૃથક્ સ્થિતો
　　બુદ્ધ્યાપરિચ્છિન્નપરઃ સ એવ હિ ॥ ૪૦॥

ચિદ્બિમ્બસાક્ષ્યાત્મધિયાં પ્રસઙ્ગત-
　　સ્ત્વેકત્ર વાસાદનલાક્તલોહવત્ ।
અન્યોન્યમધ્યાસવશાત્પ્રતીયતે
　　જડાજડત્વં ચ ચિદાત્મચેતસોઃ ॥ ૪૧॥

ગુરોઃ સકાશાદપિ વેદવાક્યતઃ ।
　　સઞ્જાતવિદ્યાનુભવો નિરીક્ષ્ય તમ્ ।
સ્વાત્માનમાત્મસ્થમુપાધિવર્જિતં
　　ત્યજેદશેષં જડમાત્મગોચરમ્ ॥ ૪૨॥

પ્રકાશરૂપોઽહમજોઽહમદ્વયો-
　　ઽસકૃદ્વિભાતોઽહમતીવ નિર્મલઃ ।

વિશુદ્ધ વિજ્ઞાનઘનો નિરામયઃ
　　સમ્પૂર્ણ આનન્દમયોઽહમક્રિયઃ ॥ ૪૩॥

સદૈવ મુક્તોઽહમચિન્ત્યશક્તિમાન્
　　અતીન્દ્રિયજ્ઞાનમવિક્રિયાત્મકઃ ।
અનન્તપારોઽહમહર્નિશં બુધૈઃ
　　વિભાવિતોઽહં હૃદિ વેદવાદિભિઃ ॥ ૪૪॥

એવં સદાત્માનમખણ્ડિતાત્મના
　　વિચારમાણસ્ય વિશુદ્ધભાવના ।
હન્યાદવિદ્યામચિરેણ કારકૈ
　　રસાયનં યદ્વદુપાસિતં રુજઃ ॥ ૪૫॥

વિવિક્ત આસીન ઉપારતેન્દ્રિયો
　　વિનિર્જિતાત્મા વિમલાન્તરાશયઃ ।
વિભાવયેદેકમનન્યસાધનો
　　વિજ્ઞાનદૃક્કેવલ આત્મસંસ્થિતઃ ॥ ૪૬॥

વિશ્વં યદેતત્પરમાત્મદર્શનં
　　વિલાપયેદાત્મનિ સર્વકારણે ।
પૂર્ણશ્ચિદાનન્દમયોઽવતિષ્ઠતે
　　ન વેદ બાહ્યં ન ચ કિઞ્ચિદાન્તરમ્ ॥ ૪૭॥

પૂર્વં સમાધેરખિલં વિચિન્તયે-
　　દોઙ્કારમાત્રં સચરાચરં જગત્ ।
તદેવ વાચ્યં પ્રણવો હિ વાચકો
　　વિભાવ્યતેઽજ્ઞાનવશાન્ન બોધતઃ ॥ ૪૮॥

અકારસઞ્જ્ઞઃ પુરુષો હિ વિશ્વકો
　　હ્યુકારકસ્તૈજસ ઈર્યતે ક્રમાત્ ।
પ્રાજ્ઞો મકારઃ પરિપઠ્યતેઽખિલૈઃ
　　સમાધિપૂર્વં ન તુ તત્ત્વતો ભવેત્ ॥ ૪૯॥

વિશ્વં ત્વકારં પુરુષં વિલાપયે-
　　દુકારમધ્યે બહુધા વ્યવસ્થિતમ્ ।
તતો મકારે પ્રવિલાપ્ય તૈજસં
　　દ્વિતીયવર્ણં પ્રણવસ્ય ચાન્તિમે ॥ ૫૦॥

મકારમપ્યાત્મનિ ચિદ્ઘને પરે
 વિલાપયેદ્પ્રાજ્ઞમપીહ કારણમ્ ।
સોઽહં પરં બ્રહ્મ સદા વિમુક્તિમ-
 દ્વિજ્ઞાનદૃઙ્મુક્ત ઉપાધિતોઽમલઃ ॥ ૫૧॥

એવં સદા જાતપરાત્મભાવનઃ
 સ્વાનન્દતુષ્ટઃ પરિવિસ્મૃતાખિલઃ ।
આસ્તે સ નિત્યાત્મસુખપ્રકાશકઃ
 સાક્ષાદ્વિમુક્તોઽચલવારિસિન્ધુવત્ ॥ ૫૨॥

એવં સદાભ્યસ્તસમાધિયોગિનો
 નિવૃત્તસર્વેન્દ્રિયગોચરસ્ય હિ ।
વિનિર્જિતાશેષરિપોરહં સદા
 દૃશ્યો ભવેયં જિતષડ્ગુણાત્મનઃ ॥ ૫૩॥

ધ્યાત્વૈવમાત્માનમહર્નિશં મુનિ-
 સ્તિષ્ઠેત્સદા મુક્તસમસ્તબન્ધનઃ ।
પ્રારબ્ધમશ્નન્નભિમાનવર્જિતો
 મય્યેવ સાક્ષાત્પ્રવિલીયતે તતઃ ॥ ૫૪॥

આદૌ ચ મધ્યે ચ તથૈવ ચાન્તતો
 ભવં વિદિત્વા ભયશોકકારણમ્ ।
હિત્વા સમસ્તં વિધિવાદચોદિતં
 ભજેત્સ્વમાત્માનમથાખિલાત્મનામ્ ॥ ૫૫॥

આત્મન્યભેદેન વિભાવયન્નિદં
 ભવત્યભેદેન મયાત્મના તદા ।
યથા જલં વારિનિધૌ યથા પયઃ
 ક્ષીરે વિયદ્વ્યોમ્ન્યનિલે યથાનિલઃ ॥ ૫૬॥

ઇત્થં યદીક્ષેત હિ લોકસંસ્થિતો
 જગન્મૃષૈવેતિ વિભાવયન્મુનિઃ ।
નિરાકૃતત્વાચ્છ્રુતિયુક્તિમાનતો
 યથેન્દુભેદો દિશિ દિગ્ભ્રમાદયઃ ॥ ૫૭॥

યાવન્ન પશ્યેદખિલં મદાત્મકં

તાવન્મદારાધનતત્પરો ભવેત્ ।
શ્રદ્ધાલુરત્યૂર્જિતભક્તિલક્ષણો
યસ્તસ્ય દૃશ્યોઽહમહર્નિશં હૃદિ ॥ ૫૮॥

રહસ્યમેતચ્છ્રુતિસારસઙ્ગ્રહં
મયા વિનિશ્ચિત્ય તવોદિતં પ્રિય ।
યસ્ત્વેતદાલોચયતીહ બુદ્ધિમાન્
સ મુચ્યતે પાતકરાશિભિઃ ક્ષણાત્ ॥ ૫૯॥

ભ્રાતર્યદીદં પરિદૃશ્યતે જગ-
ન્માયૈવ સર્વં પરિહૃત્ય ચેતસા ।
મદ્ભાવનાભાવિતશુદ્ધમાનસઃ
સુખી ભવાનન્દમયો નિરામયઃ ॥ ૬૦॥

યઃ સેવતે મામગુણં ગુણાત્પરં
હૃદા કદા વા યદિ વા ગુણાત્મકમ્ ।
સોઽહં સ્વપાદાઞ્ચિતરેણુભિઃ સ્પૃશન્
પુનાતિ લોકત્રિતયં યથા રવિઃ ॥ ૬૧॥

વિજ્ઞાનમેતદખિલં શ્રુતિસારમેકં
વેદાન્તવેદ્યચરણેન મયૈવ ગીતમ્ ।
યઃ શ્રદ્ધયા પરિપઠેદ્ ગુરુભક્તિયુક્તો
મદ્રૂપમેતિ યદિ મદ્વચનેષુ ભક્તિઃ ॥ ૬૨॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે ઉત્તરકાણ્ડે
પઞ્ચમઃ સર્ગઃ ॥ ૫॥

## ॥ ષષ્ઠઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
એકદા મુનયઃ સર્વે યમુનાતીરવાસિનઃ ।
આજગ્મૂ રાઘવં દ્રષ્ટું ભયાલ્લવણરક્ષસઃ ॥ ૧॥

કૃત્વાગ્રે તુ મુનિશ્રેષ્ઠં ભાર્ગવં ચ્યવનં દ્વિજાઃ ।
અસઙ્ખ્યાતાઃ સમાયાતા રામાદભયકાઙ્ક્ષિણઃ ॥ ૨॥

તાન્ પૂજયિત્વા પરયા ભક્ત્યા રઘુકુલોત્તમઃ ।
ઉવાચ મધુરં વાક્યં હર્ષયન્ મુનિમણ્ડલમ્ ॥ ૩॥

કરવાણિ મુનિશ્રેષ્ઠાઃ કિમાગમનકારણમ્ ।
ધન્યોઽસ્મિ યદિ યૂયં માં પ્રીત્યા દ્રષ્ટુમિહાગતાઃ ॥ ૪॥

દુષ્કરં ચાપિ યત્કાર્યં ભવતાં તત્કરોમ્યહમ્ ।
આજ્ઞાપયન્તુ માં ભૃત્યં બ્રાહ્મણા દૈવતં હિ મે ॥ ૫॥

તચ્છ્રુત્વા સહસા હૃષ્ટશ્ચ્યવનો વાક્યમબ્રવીત્ ।
મધુનામા મહાદૈત્યઃ પુરા કૃતયુગે પ્રભો ॥ ૬॥

આસીદતીવ ધર્માત્મા દેવબ્રાહ્મણપૂજકઃ ।
તસ્ય તુષ્ટો મહાદેવો દદૌ શૂલમનુત્તમમ્ ॥ ૭॥

પ્રાહ ચાનેન યં હંસિ સ તુ ભસ્મીભવિષ્યતિ ।
રાવણસ્યાનુજા ભાર્યા તસ્ય કુમ્ભીનસી શ્રુતા ॥ ૮॥

તસ્યાં તુ લવણો નામ રાક્ષસો ભીમવિક્રમઃ ।
આસીદ્દુરાત્મા દુર્ધર્ષો દેવબ્રાહ્મણહિંસકઃ ॥ ૯॥

પીડિતાસ્તેન રાજેન્દ્ર વયં ત્વાં શરણં ગતાઃ ।
તચ્છ્રુત્વા રાઘવોઽપ્યાહ મા ભીર્વો મુનિપુઙ્ગવાઃ ॥ ૧૦॥

લવણં નાશયિષ્યામિ ગચ્છન્તુ વિગતજ્વરાઃ ।
ઇત્યુક્ત્વા પ્રાહ રામોઽપિ ભ્રાતૄન્ કો વા હનિષ્યતિ ॥ ૧૧॥

લવણં રાક્ષસં દદ્યાત્ બ્રાહ્મણેભ્યોઽભયં મહત્ ।
તચ્છ્રુત્વા પ્રાઞ્જલિઃ પ્રાહ ભરતો રાઘવાય વૈ ॥ ૧૨॥

અહમેવ હનિષ્યામિ દેવાજ્ઞાપય માં પ્રભો ।
તતો રામં નમસ્કૃત્ય શત્રુઘ્નો વાક્યમબ્રવીત્ ॥ ૧૩॥

લક્ષ્મણેન મહત્કાર્યં કૃતં રાઘવ સંયુગે ।
નન્દિગ્રામે મહાબુદ્ધિર્ભરતો દુઃખમન્વભૂત્ ॥ ૧૪॥

અહમેવ ગમિષ્યામિ લવણસ્ય વધાય ચ ।
ત્વત્પ્રસાદાદ્રઘુશ્રેષ્ઠ હન્યાં તં રાક્ષસં યુધિ ॥ ૧૫॥

તચ્છ્રુત્વા સ્વાઙ્કમારોપ્ય શત્રુઘ્નં શત્રુસૂદનઃ ।

પ્રાહાદ્યૈવાભિષેક્ષ્યામિ મથુરારાજ્યકારણાત્ ॥ ૧૬॥

આનાય્ય ચ સુસમ્ભારાન્ લક્ષ્મણેનાભિષેચને ।
અનિચ્છન્તમપિ સ્નેહાદભિષેકમકારયત્ ॥ ૧૭॥

દત્ત્વા તસ્મૈ શરં દિવ્યં રામઃ શત્રુઘ્નમબ્રવીત્ ।
અનેન જહિ બાણેન લવણં લોકકણ્ટકમ્ ॥ ૧૮॥

સ તુ સમ્પૂજ્ય તચ્છૂલં ગેહે ગચ્છતિ કાનનમ્ ।
ભક્ષણાર્થં તુ જન્તૂનાં નાનાપ્રાણિવધાય ચ ॥ ૧૯॥

સ તુ નાયાતિ સદનં યાવદ્વનચરો ભવેત્ ।
તાવદેવ પુરદ્વારિ તિષ્ઠ ત્વં ધૃતકાર્મુકઃ ॥ ૨૦॥

યોત્સ્યતે સ ત્વયા ક્રુદ્ધસ્તદા વધ્યો ભવિષ્યતિ ।
તં હત્વા લવણં ક્રૂરં તદ્વનં મધુસઞ્જ્ઞિતમ્ ॥ ૨૧॥

નિવેશ્ય નગરં તત્ર તિષ્ઠ ત્વં મેઽનુશાસનાત્ ।
અશ્વાનાં પઞ્ચસાહસ્રં રથાનાં ચ તદર્ધકમ્ ॥ ૨૨॥

ગજાનાં ષટ્ શતાનીહ પત્તીનામયુતત્રયમ્ ।
આગમિષ્યતિ પશ્ચાત્ત્વમગ્રે સાધય રાક્ષસમ્ ॥ ૨૩॥

ઇત્યુક્ત્વા મૂર્ધ્ન્યવઘ્રાય પ્રેષયામાસ રાઘવઃ ।
શત્રુઘ્નં મુનિભિઃ સાર્ધમાશીર્ભિરભિનન્દ્ય ચ ॥ ૨૪॥

શત્રુઘ્નોઽપિ તથા ચક્રે યથા રામેણ ચોદિતઃ ।
હત્વા મધુસુતં યુદ્ધે મથુરામકરોત્પુરીમ્ ॥ ૨૫॥

સ્ફીતાં જનપદાં ચક્રે મથુરાં દાનમાનતઃ ।
સીતાપિ સુષુવે પુત્રૌ દ્વૌ વાલ્મીકેરથાશ્રમે ॥ ૨૬॥

મુનિસ્તયોર્નામ ચક્રે કુશો જ્યેષ્ઠોઽનુજો લવઃ ।
ક્રમેણ વિદ્યાસમ્પન્નૌ સીતાપુત્રૌ બભૂવતુઃ ॥ ૨૭॥

ઉપનીતૌ ચ મુનિના વેદાધ્યયનતત્પરૌ ।
કૃત્સ્નં રામાયણં પ્રાહ કાવ્યં બાલકયોર્મુનિઃ ॥ ૨૮॥

શઙ્કરેણ પુરા પ્રોક્તં પાર્વત્યૈ પુરહારિણા ।
વેદોપબૃંહનાર્થાય તાવગ્રાહયત પ્રભુઃ ॥ ૨૯॥

કુમારૌ સ્વરસમ્પન્નૌ સુન્દરાવશ્વિનાવિવ ।
તન્ત્રીતાલસમાયુક્તૌ ગાયન્તૌ ચેરતુર્વને ॥ ૩૦॥

તત્ર તત્ર મુનીનાં તૌ સમાજે સુરરૂપિણૌ ।
ગાયન્તાવભિતો દૃષ્ટ્વા વિસ્મિતા મુનયોઽબ્રુવન્ ॥ ૩૧॥

ગન્ધર્વેષ્વિવ કિન્નરેષુ ભુવિ વા દેવેષુ દેવાલયે
પાતાલેષ્વથવા ચતુર્મુખગૃહે લોકેષુ સર્વેષુ ચ ।
અસ્માભિશ્ચિરજીવિભિશ્ચિરતરં દૃષ્ટ્વા દિશઃ સર્વતો
નાજ્ઞાયીદૃશગીતવાદ્યગરિમા નાદર્શિ નાશ્રાવિ ચ ॥ ૩૨॥

એવં સ્તુવદ્ભિરખિલૈર્મુનિભિઃ પ્રતિવાસરમ્ ।
આસાતે સુખમેકાન્તે વાલ્મીકેરાશ્રમે ચિરમ્ ॥ ૩૩॥

અથ રામોઽશ્વમેધાદીંશ્ચકાર બહુદક્ષિણાન્ ।
યજ્ઞાન્ સ્વર્ણમયીં સીતાં વિધાય વિપુલદ્યુતિઃ ॥ ૩૪॥

તસ્મિન્ વિતાને ઋષયઃ સર્વે રાજર્ષયસ્તથા ।
બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ સમાજગ્મુર્દિદૃક્ષવઃ ॥ ૩૫॥

વાલ્મીકિરપિ સઙ્ગૃહ્ય ગાયન્તૌ તૌ કુશીલવૌ ।
જગામ ઋષિવાટસ્ય સમીપં મુનિપુઙ્ગવઃ ॥ ૩૬॥

તત્રૈકાન્તે સ્થિતં શાન્તં સમાધિવિરમે મુનિમ્ ।
કુશઃ પપ્રચ્છ વાલ્મીકિં જ્ઞાનશાસ્ત્રં કથાન્તરે ॥ ૩૭॥

ભગવન્ શ્રોતુમિચ્છામિ સઙ્ક્ષેપાદ્ભવતોઽખિલમ્ ।
દેહિનઃ સંસૃતિર્બન્ધઃ કથમુત્પદ્યતે દૃઢઃ ॥ ૩૮॥

કથં વિમુચ્યતે દેહી દૃઢબન્ધાદ્ભવાભિધાત્ ।
વક્તુમર્હસિ સર્વજ્ઞ મહ્યં શિષ્યાય તે મુને ॥ ૩૯॥

વાલ્મીકિરુવાચ ।
શૃણુ વક્ષ્યામિ તે સર્વં સઙ્ક્ષેપાદ્બન્ધમોક્ષયોઃ ।
સ્વરૂપં સાધનં ચાપિ મત્તઃ શ્રુત્વા યથોદિતમ્ ॥ ૪૦॥

તથૈવાચર ભદ્રં તે જીવન્મુક્તો ભવિષ્યસિ ।
દેહ એવ મહાગેહમદેહસ્ય ચિદાત્મનઃ ॥ ૪૧॥

તસ્યાહઙ્કાર એવાસ્મિન્મન્ત્રી તેનૈવ કલ્પિતઃ ।

દેહગેહાભિમાનં સ્વં સમારોપ્ય ચિદાત્મનિ ॥ ૪૨॥

તેન તાદાત્મ્યમાપન્નઃ સ્વચેષ્ટિતમશેષતઃ ।
વિદધાતિ ચિદાનન્દે તદ્ભાસિતવપુઃ સ્વયમ્ ॥ ૪૩॥

તેન સઙ્કલ્પિતો દેહી સઙ્કલ્પનિગડાવૃતઃ ।
પુત્રદારગૃહાદીનિ સઙ્કલ્પયતિ ચાનિશમ્ ॥ ૪૪॥

સઙ્કલ્પયન્ સ્વયં દેહી પરિશોચતિ સર્વદા ।
ત્રયસ્તસ્યાહમો દેહા અધમોત્તમમધ્યમાઃ ॥ ૪૫॥

તમઃ સત્ત્વરજઃ સઞ્જ્ઞા જગતઃ કારણં સ્થિતેઃ ।
તમોરૂપાદ્ધિ સઙ્કલ્પાન્નિત્યં તામસચેષ્ટયા ॥ ૪૬॥

અત્યન્તં તામસો ભૂત્વા કૃમિકીટત્વમાપ્નુયાત્ ।
સત્ત્વરૂપો હિ સઙ્કલ્પો ધર્મજ્ઞાનપરાયણઃ ॥ ૪૭॥

અદૂરમોક્ષસામ્રાજ્યઃ સુખરૂપો હિ તિષ્ઠતિ ।
રજોરૂપો હિ સઙ્કલ્પો લોકે સ વ્યવહારવાન્ ॥ ૪૮॥

પરિતિષ્ઠતિ સંસારે પુત્રદારાનુરઞ્જિતઃ ।
ત્રિવિધં તુ પરિત્યજ્ય રૂપમેતન્મહામતે ॥ ૪૯॥

સઙ્કલ્પં પરમાપ્નોતિ પદમાત્મપરિક્ષયે ।
દૃષ્ટીઃ સર્વાઃ પરિત્યજ્ય નિયમ્ય મનસા મનઃ ॥ ૫૦॥

સબાહ્યાભ્યન્તરાર્થસ્ય સઙ્કલ્પસ્ય ક્ષયં કુરુ ।
યદિ વર્ષસહસ્રાણિ તપશ્ચરસિ દારુણમ્ ॥ ૫૧॥

પાતાલસ્થસ્ય ભૂસ્થસ્ય સ્વર્ગસ્થસ્યાપિ તેઽનઘ ।
નાન્યઃ કશ્ચિદુપાયોઽસ્તિ સઙ્કલ્પોપશમાદૃતે ॥ ૫૨॥

અનાબાધેઽવિકારે સ્વે સુખે પરમપાવને ।
સઙ્કલ્પોપશમે યત્નં પૌરુષેણ પરં કુરુ ॥ ૫૩॥

સઙ્કલ્પતન્તૌ નિખિલા ભાવાઃ પ્રોતાઃ કિલાનઘ ।
છિન્ને તન્તૌ ન જાનીમઃ ક્વ યાન્તિ વિભવાઃ પરાઃ ॥ ૫૪॥

નિઃસઙ્કલ્પો યથાપ્રાપ્તવ્યવહારપરો ભવ ।
ક્ષયે સઙ્કલ્પજાલસ્ય જીવો બ્રહ્મત્વમાપ્નુયાત્ ॥ ૫૫॥

અધિગતપરમાર્થતામુપેત્ય પ્રસભમપાસ્ય વિકલ્પજાલમુચ્ચૈઃ ।
અધિગમય પદં તદદ્વિતીયં વિતતસુખાય સુષુપ્તચિત્તવૃત્તિઃ ॥ ૫૬॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે ઉત્તરકાણ્ડે ષષ્ઠઃ
સર્ગઃ ॥ ૬॥

## ॥ સપ્તમ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।

વાલ્મીકિના બોધિતોઽસૌ કુશઃ સદ્યોગતભ્રમઃ ।
અન્તર્મુક્તો બહિઃ સર્વમનુકુર્વંશ્ચકાર સઃ ॥ ૧॥

વાલ્મીકિરપિ તૌ પ્રાહ સીતાપુત્રૌ મહાધિયૌ ।
તત્ર તત્ર ચ ગાયન્તૌ પુરે વીથિષુ સર્વતઃ ॥ ૨॥

રામસ્યાગ્રે પ્રગાયેતં શુશ્રૂષુર્યદિ રાઘવઃ ।
ન ગ્રાહ્યં વૈ યુવાભ્યાં તદ્યદિ કિઞ્ચિત્પ્રદાસ્યતિ ॥ ૩॥

ઇતિ તૌ ચોદિતૌ તત્ર ગાયમાનૌ વિચેરતુઃ ।
યથોક્તમૃષિણા પૂર્વં તત્ર તત્રાભ્યગાયતામ્ ॥ ૪॥

તાં સ શુશ્રાવ કાકુત્સ્થઃ પૂર્વચર્યાં તતસ્તતઃ ।
અપૂર્વપાઠજાતિં ચ ગેયેન સમભિપ્લુતામ્ ॥ ૫॥

બાલયો રાઘવઃ શ્રુત્વા કૌતૂહલમુપેયિવાન્ ।
અથ કર્માન્તરે રાજા સમાહૂય મહામુનીન્ ॥ ૬॥

રાજ્ઞશ્ચૈવ નરવ્યાઘ્રઃ પણ્ડિતાંશ્ચૈવ નૈગમાન્ ।
પૌરાણિકાન્ શબ્દવિદો યે ચ વૃદ્ધા દ્વિજાતયઃ ॥ ૭॥

એતાન્ સર્વાન્ સમાહૂય ગાયકૌ સમવેશયત્ ।
તે સર્વે હૃષ્ટમનસો રાજાનો બ્રાહ્મણાદયઃ ॥ ૮॥

રામં તૌ દારકૌ દૃષ્ટ્વા વિસ્મિતાઃ હ્યનિમેષણાઃ ।
અવોચન્ સર્વ એવૈતે પરસ્પરમથાગતાઃ ॥ ૯॥

ઇમૌ રામસ્ય સદૃશૌ બિમ્બાદ્બિમ્બમિવોદિતૌ ।

જટિલૌ યદિ ન સ્યાતાં ન ચ વલ્કલધારિણૌ ॥ ૧૦॥

વિશેષં નાધિગચ્છામો રાઘવસ્યાનયોસ્તદા ।
એવં સંવદતાં તેષાં વિસ્મિતાનાં પરસ્પરમ્ ॥ ૧૧॥

ઉપચક્રમતુર્ગાતું તાવુભૌ મુનિદારકૌ ।
તતઃ પ્રવૃત્તં મધુરં ગાન્ધર્વમતિમાનુષમ્ ॥ ૧૨॥

શ્રુત્વા તન્મધુરં ગીતમપરાહ્ણે રઘૂત્તમઃ ।
ઉવાચ ભરતં ચાભ્યાં દીયતામયુતં વસુ ॥ ૧૩॥

દીયમાનં સુવર્ણં તુ ન તજ્જગૃહતુસ્તદા ।
કિમનેન સુવર્ણેન રાજન્નૌ વન્યભોજનૌ ॥ ૧૪॥

ઇતિ સન્ત્યજ્ય સન્દત્તં જગ્મતુર્મુનિસન્નિધિમ્ ।
એવં શ્રુત્વા તુ ચરિતં રામઃ સ્વસ્યૈવ વિસ્મિતઃ ॥ ૧૫॥

જ્ઞાત્વા સીતાકુમારૌ તૌ શત્રુઘ્નં ચેદમબ્રવીત્ ।
હનૂમન્તં સુષેણં ચ વિભીષણમથાઙ્ગદમ્ ॥ ૧૬॥

ભગવન્તં મહાત્માનં વાલ્મીકિં મુનિસત્તમમ્ ।
આનયધ્વં મુનિવરં સસીતં દેવસમ્મિતમ્ ॥ ૧૭॥

અસ્યાસ્તુ પર્ષદો મધ્યે પ્રત્યયં જનકાત્મજા ।
કરોતુ શપથં સર્વે જાનન્તુ ગતકલ્મષામ્ ॥ ૧૮॥

સીતાં તદ્વચનં શ્રુત્વા ગતાઃ સર્વેઽતિવિસ્મિતાઃ ।
ઊચુર્યથોક્તં રામેણ વાલ્મીકિં રામપાર્ષદાઃ ॥ ૧૯॥

રામસ્ય હૃદ્ગતં સર્વં જ્ઞાત્વા વાલ્મીકિરબ્રવીત્ ।
શ્વઃ કરિષ્યતિ વૈ સીતા શપથં જનસંસદિ ॥ ૨૦॥

યોષિતાં પરમં દૈવં પતિરેવ ન સંશયઃ ।
તચ્છ્રુત્વા સહસા ગત્વા સર્વે પ્રોચુર્મુનેર્વચઃ ॥ ૨૧॥

રાઘવસ્યાપિ રામોઽપિ શ્રુત્વા મુનિવચસ્તથા ।
રાજાનો મુનયઃ સર્વે શૃણુધ્વમિતિ ચાબ્રવીત્ ॥ ૨૨॥

સીતાયાઃ શપથં લોકા વિજાનન્તુ શુભાશુભમ્ ।
ઇત્યુક્ત્વા રાઘવેણાથ લોકાઃ સર્વે દિદૃક્ષવઃ ॥ ૨૩॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચૈવ મહર્ષયઃ ।
વાનરાશ્ચ સમાજગ્મુઃ કૌતૂહલસમન્વિતાઃ ॥ ૨૪॥

તતો મુનિવરસ્તૂર્ણં સસીતઃ સમુપાગમત્ ।
અગ્રતસ્તમૃષિં કૃત્વાઽઽયાન્તી કિઞ્ચિદવાઙ્મુખી ॥ ૨૫॥

કૃતાઞ્જલિર્બાષ્પકણ્ઠા સીતા યજ્ઞં વિવેશ તમ્ ।
દૃષ્ટ્વા લક્ષ્મીમિવાયાન્તીં બ્રહ્માણમનુયાયિનીમ્ ॥ ૨૬॥

વાલ્મીકેઃ પૃષ્ઠતઃ સીતાં સાધુવાદો મહાનભૂત્ ।
તદા મધ્યે જનૌઘસ્ય પ્રવિશ્ય મુનિપુઙ્ગવઃ ॥ ૨૭॥

સીતાસહાયો વાલ્મીકિરિતિ પ્રાહ ચ રાઘવમ્ ।
ઇયં દાશરથે સીતા સુવ્રતા ધર્મચારિણી ॥ ૨૮॥

અપાપા તે પુરા ત્યક્તા મમાશ્રમસમીપતઃ ।
લોકાપવાદભીતેન ત્વયા રામ મહાવને ॥ ૨૯॥

પ્રત્યયં દાસ્યતે સીતા તદનુજ્ઞાતુમર્હસિ ।
ઇમૌ તુ સીતાતનયાવિમૌ યમલજાતકૌ ॥ ૩૦॥

સુતૌ તુ તવ દુર્ધર્ષૌ તથ્યમેતદ્બ્રવીમિ તે ।
પ્રચેતસોઽહં દશમઃ પુત્રો રઘુકુલોદ્વહ ॥ ૩૧॥

અનૃતં ન સ્મરામ્યુક્તં તથેમૌ તવ પુત્રકૌ ।
બહૂન્ વર્ષગણાન્ સમ્યક્ તપશ્ચર્યા મયા કૃતા ॥ ૩૨॥

નોપાશ્નીયાં ફલં તસ્યા દુષ્ટેયં યદિ મૈથિલી ।
વાલ્મીકિનૈવમુક્તસ્તુ રાઘવઃ પ્રત્યભાષત ॥ ૩૩॥

એવમેતન્મહાપ્રાજ્ઞ યથા વદસિ સુવ્રત ।
પ્રત્યયો જનિતો મહ્યં તવ વાક્યૈરકિલ્બિષૈઃ ॥ ૩૪॥

લઙ્કાયામપિ દત્તો મે વૈદેહ્યા પ્રત્યયો મહાન્ ।
દેવાનાં પુરતસ્તેન મન્દિરે સમ્પ્રવેશિતા ॥ ૩૫॥

સેયં લોકભયાદ્બ્રહ્મન્નપાપાઽપિ સતી પુરા ।
સીતા મયા પરિત્યક્તા ભવાંસ્તત્ક્ષન્તુમર્હતિ ॥ ૩૬॥

મમૈવ જાતૌ જાનામિ પુત્રાવેતૌ કુશીલવૌ ।
શુદ્ધાયાં જગતીમધ્યે સીતાયાં પ્રીતિરસ્તુ મે ॥ ૩૭॥

દેવાઃ સર્વે પરિજ્ઞાય રામાભિપ્રાયમુત્સુકાઃ ।
બ્રહ્માણમગ્રતઃ કૃત્વા સમાજગ્મુઃ સહસ્રશઃ ॥ ૩૮॥

પ્રજાઃ સમાગમન્ હૃષ્ટાઃ સીતા કૌશેયવાસિની ।
ઉદઙ્મુખી હ્યધોદૃષ્ટિઃ પ્રાઞ્જલિર્વાક્યમબ્રવીત્ ॥ ૩૯॥

રામાદન્યં યથાહં વૈ મનસાપિ ન ચિન્તયે ।
તથા મે ધરણી દેવી વિવરં દાતુમર્હતિ ॥ ૪૦॥

તથા શપન્ત્યાઃ સીતાયાઃ પ્રાદુરાસીન્મહાદ્ભુતમ્ ।
ભૂતલાદ્દિવ્યમત્યર્થં સિંહાસનમનુત્તમમ્ ॥ ૪૧॥

નાગેન્દ્રૈર્ધ્રિયમાણં ચ દિવ્યદેહૈ રવિપ્રભમ્ ।
ભૂદેવી જાનકીં દોર્ભ્યાં ગૃહીત્વા સ્નેહસંયુતા ॥ ૪૨॥

સ્વાગતં તામુવાચૈનામાસને સંન્યવેશયત્ ।
સિંહાસનસ્થાં વૈદેહીં પ્રવિશન્તીં રસાતલમ્ ॥ ૪૩॥

નિરન્તરા પુષ્પવૃષ્ટિર્દિવ્યા સીતામવાકિરત્ ।
સાધુવાદશ્ચ સુમહાન્ દેવાનાં પરમાદ્ભુતઃ ॥ ૪૪॥

ઊચુશ્ચ બહુધા વાચો હ્યન્તરિક્ષગતાઃ સુરાઃ ।
અન્તરિક્ષે ચ ભૂમૌ ચ સર્વે સ્થાવરજઙ્ગમાઃ ॥ ૪૫॥

વાનરાશ્ચ મહાકાયાઃ સીતાશપથકારણાત્ ।
કેચિચ્ચિન્તાપરાસ્તસ્ય કેચિદ્ધ્યાનપરાયણાઃ ॥ ૪૬॥

કેચિદ્રામં નિરીક્ષન્તઃ કેચિત્સીતામચેતસઃ ।
મુહૂર્તમાત્રં તત્સર્વં તૂષ્ણીમ્ભૂતમચેતનમ્ ॥ ૪૭॥

સીતાપ્રવેશનં દૃષ્ટ્વા સર્વં સમ્મોહિતં જગત્ ।
રામસ્તુ સર્વં જ્ઞાત્વૈવ ભવિષ્યત્કાર્યગૌરવમ્ ॥ ૪૮॥

અજાનન્નિવ દુઃખેન શુશોચ જનકાત્મજામ્ ।
બ્રહ્મણા ઋષિભિઃ સાર્ધં બોધિતો રઘુનન્દનઃ ॥ ૪૯॥

પ્રતિબુદ્ધ ઇવ સ્વપ્નાચ્ચકારાનન્તરાઃ ક્રિયાઃ ।
વિસસર્જ ઋષીન્ સર્વાનૃત્વિજો યે સમાગતાઃ ॥ ૫૦॥

તાન્ સર્વાન્ ધનરત્નાદ્યૈસ્તોષયામાસ ભૂરિશઃ ।

ઉપાદાય કુમારૌ તાવયોધ્યામગમત્પ્રભુઃ ॥ ૫૧॥

તદાદિ નિઃસ્પૃહો રામઃ સર્વભોગેષુ સર્વદા ।
આત્મચિન્તાપરો નિત્યમેકાન્તે સમુપસ્થિતઃ ॥ ૫૨॥

એકાન્તે ધ્યાનનિરતે એકદા રાઘવે સતિ ।
જ્ઞાત્વા નારાયણં સાક્ષાત્કૌસલ્યા પ્રિયવાદિની ॥ ૫૩॥

ભક્ત્યાગત્ય પ્રસન્નં તં પ્રણતા પ્રાહ હૃષ્ટધીઃ ।
રામ ત્વં જગતામાદિરાદિમધ્યાન્તવર્જિતઃ ॥ ૫૪॥

પરમાત્મા પરાનન્દઃ પૂર્ણઃ પુરુષ ઈશ્વરઃ ।
જાતોઽસિ મે ગર્ભગૃહે મમ પુણ્યાતિરેકતઃ ॥ ૫૫॥

અવસાને મમાપ્યદ્ય સમયોઽભૂદ્રઘૂત્તમ ।
નાદ્યાપ્યબોધજઃ કૃત્સ્નો ભવબન્ધો નિવર્તતે ॥ ૫૬॥

ઇદાનીમપિ મે જ્ઞાનં ભવબન્ધનિવર્તકમ્ ।
યથા સઙ્ક્ષેપતો ભૂયાત્તથા બોધય માં વિભો ॥ ૫૭॥

નિર્વેદવાદિનીમેવં માતરં માતૃવત્સલઃ ।
દયાલુઃ પ્રાહ ધર્માત્મા જરાજર્જરિતાં શુભામ્ ॥ ૫૮॥

માર્ગાસ્ત્રયો મયા પ્રોક્તાઃ પુરા મોક્ષાપ્તિસાધકાઃ ।
કર્મયોગો જ્ઞાનયોગો ભક્તિયોગશ્ચ શાશ્વતઃ ॥ ૫૯॥

ભક્તિર્વિભિદ્યતે માતસ્ત્રિવિધા ગુણભેદતઃ ।
સ્વભાવો યસ્ય યસ્તેન તસ્ય ભક્તિર્વિભિદ્યતે ॥ ૬૦॥

યસ્તુ હિંસાં સમુદ્દિશ્ય દમ્ભં માત્સર્યમેવ વા ।
ભેદદૃષ્ટિશ્ચ સંરમ્ભી ભક્તો મે તામસઃ સ્મૃતઃ ॥ ૬૧॥

ફલાભિસન્ધિર્ભોગાર્થી ધનકામો યશસ્તથા ।
અર્ચાદૌ ભેદબુદ્ધ્યા માં પૂજયેત્સ તુ રાજસઃ ॥ ૬૨॥

પરસ્મિન્નર્પિતં યસ્તુ કર્મનિર્હરણાય વા ।
કર્તવ્યમિતિ વા કુર્યાદ્ભેદબુદ્ધ્યા સ સાત્ત્વિકઃ ॥ ૬૩॥

મદ્ગુણાશ્રયણાદેવ મય્યનન્તગુણાલયે ।
અવિચ્છિન્ના મનોવૃત્તિર્યથા ગઙ્ગામ્બુનોઽમ્બુધૌ ॥ ૬૪॥

તદેવ ભક્તિયોગસ્ય લક્ષણં નિર્ગુણસ્ય હિ ।
અહૈતુક્યવ્યવહિતા યા ભક્તિર્મયિ જાયતે ॥ ૬૫॥

સા મે સાલોક્યસામીપ્યસાર્ષ્ટિસાયુજ્યમેવ વા ।
દદાત્યપિ ન ગૃહ્ણન્તિ ભક્તા મત્સેવનં વિના ॥ ૬૬॥

સ એવાત્યન્તિકો યોગો ભક્તિમાર્ગસ્ય ભામિનિ ।
મદ્ભાવં પ્રાપ્નુયાત્તેન અતિક્રમ્ય ગુણત્રયમ્ ॥ ૬૭॥

મહતા કામહીનેન સ્વધર્માચરણેન ચ ।
કર્મયોગેન શસ્તેન વર્જિતેન વિહિંસનાત્ ॥ ૬૮॥

મદ્દર્શનસ્તુતિમહાપૂજાભિઃ સ્મૃતિવન્દનૈઃ ।
ભૂતેષુ મદ્ભાવનયા સઙ્ગેનાસત્યવર્જનૈઃ ॥ ૬૯॥

બહુમાનેન મહતાં દુઃખિનામનુકમ્પયા ।
સ્વસમાનેષુ મૈત્ર્યા ચ યમાદીનાં નિષેવયા ॥ ૭૦॥

વેદાન્તવાક્યશ્રવણાન્મમ નામાનુકીર્તનાત્ ।
સત્સઙ્ગેનાર્જવેનૈવ હ્યહમઃ પરિવર્જનાત્ ॥ ૭૧॥

કાઙ્ક્ષયા મમ ધર્મસ્ય પરિશુદ્ધાન્તરો જનઃ ।
મદ્ગુણશ્રવણાદેવ યાતિ મામઞ્જસા જનઃ ॥ ૭૨॥

યથા વાયુવશાદ્ગન્ધઃ સ્વાશ્રયાદ્ઘ્રાણમાવિશેત્ ।
યોગાભ્યાસરતં ચિત્તમેવમાત્માનમાવિશેત્ ॥ ૭૩॥

સર્વેષુ પ્રાણિજાતેષુ હ્યહમાત્મા વ્યવસ્થિતઃ ।
તમજ્ઞાત્વા વિમૂઢાત્મા કુરુતે કેવલં બહિઃ ॥ ૭૪॥

ક્રિયોત્પન્નૈર્નૈકભેદૈર્દ્રવ્યૈર્મે નામ્બ તોષણમ્ ।
ભૂતાવમાનિનાર્ચાયામર્ચિતોઽહં ન પૂજિતઃ ॥ ૭૫॥

તાવન્મામર્ચયેદ્દેવં પ્રતિમાદૌ સ્વકર્મભિઃ ।
યાવત્સર્વેષુ ભૂતેષુ સ્થિતં ચાત્મનિ ન સ્મરેત્ ॥ ૭૬॥

યસ્તુ ભેદં પ્રકુરુતે સ્વાત્મનશ્ચ પરસ્ય ચ ।
ભિન્નદૃષ્ટેર્ભયં મૃત્યુસ્તસ્ય કુર્યાન્ન સંશયઃ ॥ ૭૭॥

મામતઃ સર્વભૂતેષુ પરિચ્છિન્નેષુ સંસ્થિતમ્ ।
એકં જ્ઞાનેન માનેન મૈત્ર્યા ચાર્ચેદભિન્નધીઃ ॥ ૭૮॥

ચેતસૈવાનિશં સર્વભૂતાનિ પ્રણમેત્સુધીઃ ।
જ્ઞાત્વા માં ચેતનં શુદ્ધં જીવરૂપેણ સંસ્થિતમ્ ॥ ૭૯॥

તસ્માત્કદાચિન્નેક્ષેત ભેદમીશ્વરજીવયોઃ ।
ભક્તિયોગો જ્ઞાનયોગો મયા માતરુદીરિતઃ ॥ ૮૦॥

આલમ્બ્યૈકતરં વાપિ પુરુષઃ શુભમૃચ્છતિ ।
તતો માં ભક્તિયોગેન માતઃ સર્વહૃદિ સ્થિતમ્ ॥ ૮૧॥

પુત્રરૂપેણ વા નિત્યં સ્મૃત્વા શાન્તિમવાપ્સ્યસિ ।
શ્રુત્વા રામસ્ય વચનં કૌસલ્યાઽઽનન્દસંયુતા ॥ ૮૨॥

રામં સદા હૃદિ ધ્યાત્વા છિત્ત્વા સંસારબન્ધનમ્ ।
અતિક્રમ્ય ગતીસ્તિસ્રોઽપ્યવાપ પરમાં ગતિમ્ ॥ ૮૩॥

કૈકેયી ચાપિ યોગં રઘુપતિગદિતં પૂર્વમેવાધિગમ્ય
શ્રદ્ધાભક્તિપ્રશાન્તા હૃદિ રઘુતિલકં ભાવયન્તી ગતાસુઃ ।
ગત્વા સ્વર્ગં સ્ફુરન્તી દશરથસહિતા મોદમાનાવતસ્થે
માતા શ્રીલક્ષ્મણસ્યાપ્યતિવિમલમતિઃ પ્રાપ ભર્તુઃ સમીપમ્ ॥ ૮૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે ઉત્તરકાણ્ડે સપ્તમઃ
સર્ગઃ ॥ ૭॥

## ॥ અષ્ટમ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।

અથ કાલે ગતે કસ્મિન્ ભરતો ભીમવિક્રમઃ ।
યુધાજિતા માતુલેન હ્યાહૂતોઽગાત્સસૈનિકઃ ॥ ૧॥

રામાજ્ઞયા ગતસ્તત્ર હત્વા ગન્ધર્વનાયકાન્ ।
તિસ્રઃ કોટીઃ પુરે દ્વે તુ નિવેશ્ય રઘુનન્દનઃ ॥ ૨॥

પુષ્કરં પુષ્કરાવત્યાં તક્ષં તક્ષશિલાહ્વયે ।
અભિષિચ્ય સુતૌ તત્ર ધનધાન્યસુહૃદ્વૃતૌ ॥ ૩॥

પુનરાગત્ય ભરતો રામસેવાપરોઽભવત્ ।
તતઃ પ્રીતો રઘુશ્રેષ્ઠો લક્ષ્મણં પ્રાહ સાદરમ્ ॥ ૪॥

ઉભૌ કુમારૌ સૌમિત્રે ગૃહીત્વા પશ્ચિમાં દિશમ્ ।
તત્ર ભિલ્લાન્ વિનિર્જિત્ય દુષ્ટાન્ સર્વાપકારિણઃ ॥ ૫॥

અઙ્ગદશ્ચિત્રકેતુશ્ચ મહાસત્ત્વપરાક્રમૌ ।
દ્વયોર્દ્વે નગરે કૃત્વા ગજાશ્વધનરત્નકૈઃ ॥ ૬॥

અભિષિચ્ય સુતૌ તત્ર શીઘ્રમાગચ્છ માં પુનઃ ।
રામસ્યાજ્ઞાં પુરસ્કૃત્ય ગજાશ્વબલવાહનઃ ॥ ૭॥

ગત્વા હત્વા રિપૂન્ સર્વાન્ સ્થાપયિત્વા કુમારકૌ ।
સૌમિત્રિઃ પુનરાગત્ય રામસેવાપરોઽભવત્ ॥ ૮॥

તતસ્તુ કાલે મહતિ પ્રયાતે
 રામં સદા ધર્મપથે સ્થિતં હરિમ્ ।
દ્રષ્ટું સમાગાદૃષિવેષધારી
 કાલસ્તતો લક્ષ્મણમિત્યુવાચ ॥ ૯॥

નિવેદયસ્વાતિબલસ્ય દૂતં
 માં દ્રષ્ટુકામં પુરુષોત્તમાય ।
રામાય વિજ્ઞાપનમસ્તિ તસ્ય
 મહર્ષિમુખ્યસ્ય ચિરાય ધીમન્ ॥ ૧૦॥

તસ્ય તદ્વચનં શ્રુત્વા સૌમિત્રિસ્ત્વરયાન્વિતઃ ।
આચચક્ષેઽથ રામાય સ સમ્પ્રાપ્તં તપોધનમ્ ॥ ૧૧॥

એવં બ્રુવન્તં પ્રોવાચ લક્ષ્મણં રાઘવો વચઃ ।
શીઘ્રં પ્રવેશ્યતાં તાત મુનિઃ સત્કારપૂર્વકમ્ ॥ ૧૨॥

લક્ષ્મણસ્તુ તથેત્યુક્ત્વા પ્રાવેશયત તાપસમ્ ।
સ્વતેજસા જ્વલન્તં તં ઘૃતસિક્તં યથાનલમ્ ॥ ૧૩॥

સોઽભિગમ્ય રઘુશ્રેષ્ઠં દીપ્યમાનઃ સ્વતેજસા ।
મુનિર્મધુરવાક્યેન વર્ધસ્વેત્યાહ રાઘવમ્ ॥ ૧૪॥

તસ્મૈ સ મુનયે રામઃ પૂજાં કૃત્વા યથાવિધિ ।
પૃષ્ટ્વાનામયમવ્યગ્રો રામઃ પૃષ્ટોઽથ તેન સઃ ॥ ૧૫॥

દિવ્યાસને સમાસીનો રામઃ પ્રોવાચ તાપસમ્ ।
યદર્થમાગતોઽસિ ત્વમિહ તત્પ્રાપયસ્વ મે ॥ ૧૬॥

વાક્યેન ચોદિતસ્તેન રામેણાહ મુનિર્વચઃ ।
દ્વન્દ્વમેવ પ્રયોક્તવ્યમનાલક્ષ્યં તુ તદ્વચઃ ॥ ૧૭॥

નાન્યેન ચૈતચ્છ્રોતવ્યં નાખ્યાતવ્યં ચ કસ્યચિત્ ।
શૃણુયાદ્વા નિરીક્ષેદ્વા યઃ સ વધ્યસ્ત્વયા પ્રભો ॥ ૧૮॥

તથેતિ ચ પ્રતિજ્ઞાય રામો લક્ષ્મણમબ્રવીત્ ।
તિષ્ઠ ત્વં દ્વારિ સૌમિત્રે નાયાત્વત્ર જનો રહઃ ॥ ૧૯॥

યદ્યાગચ્છતિ કો વાપિ સ વધ્યો મે ન સંશયઃ ।
તતઃ પ્રાહ મુનિં રામો યેન વા ત્વં વિસર્જિતઃ ॥ ૨૦॥

યત્તે મનીષિતં વાક્યં તદ્વદસ્વ મમાગ્રતઃ ।
તતઃ પ્રાહ મુનિર્વાક્યં શૃણુ રામ યથાતથમ્ ॥ ૨૧॥

બ્રહ્મણા પ્રેષિતોઽસ્મીશ કાર્યાર્થે તેઽન્તિકં પ્રભો ।
અહં હિ પૂર્વજો દેવ તવ પુત્રઃ પરન્તપ ॥ ૨૨॥

માયાસઙ્ગમજો વીર કાલઃ સર્વહરઃ સ્મૃતઃ ।
બ્રહ્મા ત્વામાહ ભગવાન્ સર્વદેવર્ષિપૂજિતઃ ॥ ૨૩॥

રક્ષિતું સ્વર્ગલોકસ્ય સમયસ્તે મહામતે ।
પુરા ત્વમેક એવાસીર્લોકાન્ સંહૃત્ય માયયા ॥ ૨૪॥

ભાર્યયા સહિતસ્ત્વં મામાદૌ પુત્રમજીજનઃ ।
તથા ભોગવતં નાગમનન્તમુદકેશયમ્ ॥ ૨૫॥

માયયા જનયિત્વા ત્વં દ્વૌ સસત્ત્વૌ મહાબલૌ ।
મધુકૈટભકૌ દૈત્યૌ હત્વા મેદોઽસ્થિસઞ્ચયમ્ ॥ ૨૬॥

ઇમાં પર્વતસમ્બદ્ધાં મેદિનીં પુરુષર્ષભ ।
પદ્મે દિવ્યાર્કસઙ્કાશે નાભ્યામુત્પાદ્ય મામપિ ॥ ૨૭॥

માં વિધાય પ્રજાધ્યક્ષં મયિ સર્વં ન્યવેદયત્ ।
સોઽહં સંયુક્તસમ્ભારસ્ત્વામવોચં જગત્પતે ॥ ૨૮॥

રક્ષાં વિધત્સ્વ ભૂતેભ્યો યે મે વીર્યાપહારિણઃ ।
તતસ્ત્વં કશ્યપાજ્જાતો વિષ્ણુર્વામનરૂપધૃક્ ॥ ૨૯॥

હૃતવાનસિ ભૂભારં વધાદ્રક્ષોગણસ્ય ચ ।
સર્વાસૂત્સાર્યમાણાસુ પ્રજાસુ ધરણીધર ॥ ૩૦॥

રાવણસ્ય વધાકાઙ્ક્ષી મર્ત્યલોકમુપાગતઃ ।
દશવર્ષસહસ્રાણિ દશવર્ષશતાનિ ચ ॥ ૩૧॥

કૃત્વા વાસસ્ય સમયં ત્રિદશેષ્વાત્મનઃ પુરા ।
સ તે મનોરથઃ પૂર્ણઃ પૂર્ણે ચાયુષિ તે નૃષુ ॥ ૩૨॥

કાલસ્તાપસરૂપેણ ત્વત્સમીપમુપાગમત્ ।
તતો ભૂયશ્ચ તે બુદ્ધિર્યદિ રાજ્યમુપાસિતુમ્ ॥ ૩૩॥

તત્તથા ભવ ભદ્રં તે એવમાહ પિતામહઃ ।
યદિ તે ગમને બુદ્ધિર્દેવલોકં જિતેન્દ્રિય ॥ ૩૪॥

સનાથા વિષ્ણુના દેવા ભજન્તુ વિગતજ્વરાઃ ।
ચતુર્મુખસ્ય તદ્વાક્યં શ્રુત્વા કાલેન ભાષિતમ્ ॥ ૩૫॥

હસન્ રામસ્તદા વાક્યં કૃત્સ્નસ્યાન્તકમબ્રવીત્ ।
શ્રુતં તવ વચો મેઽદ્ય મમાપીષ્ટતરં તુ તત્ ॥ ૩૬॥

સન્તોષઃ પરમો જ્ઞેયસ્ત્વદાગમનકારણાત્ ।
ત્રયાણામપિ લોકાનાં કાર્યાર્થં મમ સમ્ભવઃ ॥ ૩૭॥

ભદ્રં તેઽસ્ત્વાગમિષ્યામિ યત એવાહમાગતઃ ।
મનોરથસ્તુ સમ્પ્રાપ્તો ન મેઽત્રાસ્તિ વિચારણા ॥ ૩૮॥

મત્સેવકાનાં દેવાનાં સર્વકાર્યેષુ વૈ મયા ।
સ્થાતવ્યં માયયા પુત્ર યથા ચાહ પ્રજાપતિઃ ॥ ૩૯॥

એવં તયોઃ કથયતોર્દુર્વાસા મુનિરભ્યગાત્ ।
રાજદ્વારં રાઘવસ્ય દર્શનાપેક્ષયા દ્રુતમ્ ॥ ૪૦॥

મુનિર્લક્ષ્મણમાસાદ્ય દુર્વાસા વાક્યમબ્રવીત્ ।
શીઘ્રં દર્શય રામં મે કાર્યં મેઽત્યન્તમાહિતમ્ ॥ ૪૧॥

તચ્છ્રુત્વા પ્રાહ સૌમિત્રિર્મુનિં જ્વલનતેજસમ્ ।
રામેણ કાર્યં કિં તેઽદ્ય કિં તેઽભીષ્ટં કરોમ્યહમ્ ॥ ૪૨॥

રાજા કાર્યાન્તરે વ્યગ્રો મુહૂર્તં સમ્પ્રતીક્ષ્યતામ્ ।

તચ્છ્રુત્વા ક્રોધસન્તપ્તો મુનિઃ સૌમિત્રિમબ્રવીત્ ॥ ૪૩॥

અસ્મિન્ ક્ષણે તુ સૌમિત્રે ન દર્શયસિ ચેદ્વિભુમ્ ।
રામં સવિષયં વંશં ભસ્મીકુર્યાં ન સંશયઃ ॥ ૪૪॥

શ્રુત્વા તદ્વચનં ઘોરમૃષેર્દુર્વાસસો ભૃશમ્ ।
સ્વરૂપં તસ્ય વાક્યસ્ય ચિન્તયિત્વા સ લક્ષ્મણઃ ॥ ૪૫॥

સર્વનાશાદ્વરં મેઽદ્ય નાશો હ્યેકસ્ય કારણાત્ ।
નિશ્ચિત્યૈવં તતો ગત્વા રામાય પ્રાહ લક્ષ્મણઃ ॥ ૪૬॥

સૌમિત્રેર્વચનં શ્રુત્વા રામઃ કાલં વ્યસર્જયત્ ।
શીઘ્રં નિર્ગમ્ય રામોઽપિ દદર્શાત્રેઃ સુતં મુનિમ્ ॥ ૪૭॥

રામોઽભિવાદ્ય સમ્પ્રીતો મુનિં પપ્રચ્છ સાદરમ્ ।
કિં કાર્યં તે કરોમીતિ મુનિમાહ રઘૂત્તમઃ ॥ ૪૮॥

તચ્છ્રુત્વા રામવચનં દુર્વાસા રામમબ્રવીત્ ।
અદ્ય વર્ષસહસ્રાણામુપવાસસમાપનમ્ ॥ ૪૯॥

અતો ભોજનમિચ્છામિ સિદ્ધં યત્તે રઘૂત્તમ ।
રામો મુનિવચઃ શ્રુત્વા સન્તોષેણ સમન્વિતઃ ॥ ૫૦॥

સ સિદ્ધમન્નં મુનયે યથાવત્સમુપાહરત્ ।
મુનિર્ભુક્ત્વાન્નમમૃતં સન્તુષ્ટઃ પુનરભ્યગાત્ ॥ ૫૧॥

સ્વમાશ્રમં ગતે તસ્મિન્ રામઃ સસ્માર ભાષિતમ્ ।
કાલેન શોકદુઃખાર્તો વિમનાશ્ચાતિવિહ્વલઃ ॥ ૫૨॥

અવાઙ્મુખો દીનમના ન શશાકાભિભાષિતુમ્ ।
મનસા લક્ષ્મણં જ્ઞાત્વા હતપ્રાયં રઘૂદ્વહઃ ॥ ૫૩॥

અવાઙ્મુખો બભૂવાથ તૂષ્ણીમેવાખિલેશ્વરઃ ।
તતો રામં વિલોક્યાહ સૌમિત્રિર્દુઃખસમ્પ્લુતમ્ ॥ ૫૪॥

તૂષ્ણીમ્ભૂતં ચિન્તયન્તં ગર્હન્તં સ્નેહબન્ધનમ્ ।
મત્કૃતે ત્યજ સન્તાપં જહિ માં રઘુનન્દન ॥ ૫૫॥

ગતિઃ કાલસ્ય કલિતા પૂર્વમેવેદૃશી પ્રભો ।
ત્વયિ હીનપ્રતિજ્ઞે તુ નરકો મે ધ્રુવં ભવેત્ ॥ ૫૬॥

મયિ પ્રીતિર્યદિ ભવેદ્યદ્યનુગ્રાહ્યતા તવ ।
ત્યક્ત્વા શઙ્કાં જહિ પ્રાજ્ઞ મા મા ધર્મં ત્યજ પ્રભો ॥ ૫૭॥

સૌમિત્રિણોક્તં તચ્છ્રુત્વા રામશ્ચલિતમાનસઃ ।
આહૂય મન્ત્રિણઃ સર્વાન્ વસિષ્ઠં ચેદમબ્રવીત્ ॥ ૫૮॥

મુનેરાગમનં યત્તુ કાલસ્યાપિ હિ ભાષિતમ્ ।
પ્રતિજ્ઞામાત્મનશ્ચૈવ સર્વમાવેદયત્પ્રભુઃ ॥ ૫૯॥

શ્રુત્વા રામસ્ય વચનં મન્ત્રિણઃ સપુરોહિતાઃ ।
ઊચુઃ પ્રાઞ્જલયઃ સર્વે રામમક્લિષ્ટકારિણમ્ ॥ ૬૦॥

પૂર્વમેવ હિ નિર્દિષ્ટં તવ ભૂભારહારિણઃ ।
લક્ષ્મણેન વિયોગસ્તે જ્ઞાતો વિજ્ઞાનચક્ષુષા ॥ ૬૧॥

ત્યજાશુ લક્ષ્મણં રામ મા પ્રતિજ્ઞાં ત્યજ પ્રભો ।
પ્રતિજ્ઞાતે પરિત્યક્તે ધર્મો ભવતિ નિષ્ફલઃ ॥ ૬૨॥

ધર્મે નષ્ટેઽખિલે રામ ત્રૈલોક્યં નશ્યતિ ધ્રુવમ્ ।
ત્વં તુ સર્વસ્ય લોકસ્ય પાલકોઽસિ રઘૂત્તમ ॥ ૬૩॥

ત્યક્ત્વા લક્ષ્મણમેવૈકં ત્રૈલોક્યં ત્રાતુમર્હસિ ।
રામો ધર્માર્થસહિતં વાક્યં તેષામનિન્દિતમ્ ॥ ૬૪॥

સભામધ્યે સમાશ્રુત્ય પ્રાહ સૌમિત્રિમઞ્જસા ।
યથેષ્ટં ગચ્છ સૌમિત્રે મા ભૂદ્ધર્મસ્ય સંશયઃ ॥ ૬૫॥

પરિત્યાગો વધો વાપિ સતામેવોભયં સમમ્ ।
એવમુક્તે રઘુશ્રેષ્ઠે દુઃખવ્યાકુલિતેક્ષણઃ ॥ ૬૬॥

રામં પ્રણમ્ય સૌમિત્રિઃ શીઘ્રં ગૃહમગાત્સ્વકમ્ ।
તતોઽગાત્સરયૂતીરમાચમ્ય સ કૃતાઞ્જલિઃ ॥ ૬૭॥

નવ દ્વારાણિ સંયમ્ય મૂર્ધ્નિ પ્રાણમધારયત્ ।
યદક્ષરં પરં બ્રહ્મ વાસુદેવાખ્યમવ્યયમ્ ॥ ૬૮॥

પદં તત્પરમં ધામ ચેતસા સોઽભ્યચિન્તયત્ ।
વાયુરોધેન સંયુક્તં સર્વે દેવાઃ સહર્ષયઃ ॥ ૬૯॥

સાગ્નયો લક્ષ્મણં પુષ્પૈસ્તુષ્ટુવુશ્ચ સમાકિરન્ ।
અદૃશ્યં વિબુધૈઃ કૈશ્ચિત્સશરીરં ચ વાસવઃ ॥ ૭૦॥

ગૃહીત્વા લક્ષ્મણં શક્રઃ સ્વર્ગલોકમથાગમત્ ।
તતો વિષ્ણોશ્ચતુર્ભાગં તં દેવં સુરસત્તમાઃ ।
સર્વે દેવર્ષયો દૃષ્ટ્વા લક્ષ્મણં સમપૂજયન્ ॥ ૭૧॥

લક્ષ્મણે હિ દિવમાગતે હરૌ સિદ્ધલોકગતયોગિનસ્તદા ।
બ્રહ્મણા સહ સમાગમન્મુદા દ્રષ્ટુમાહિતમહાહિરૂપકમ્ ॥ ૭૨॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે ઉત્તરકાણ્ડે અષ્ટમઃ
સર્ગઃ ॥ ૮॥

## ॥ નવમ સર્ગઃ ॥

શ્રી મહાદેવ ઉવાચ ।

લક્ષ્મણં તુ પરિત્યજ્ય રામો દુઃખસમન્વિતઃ ।
મન્ત્રિણો નૈગમાંશ્ચૈવ વસિષ્ઠં ચેદમબ્રવીત્ ॥ ૧॥

અભિષેક્ષ્યામિ ભરતમધિરાજ્યે મહામતિમ્ ।
અદ્ય ચાહં ગમિષ્યામિ લક્ષ્મણસ્ય પદાનુગઃ ॥ ૨॥

એવમુક્તે રઘુશ્રેષ્ઠે પૌરજાનપદાસ્તદા ।
દ્રુમા ઇવચ્છિન્નમૂલા દુઃખાર્તાઃ પતિતા ભુવિ ॥ ૩॥

મૂર્ચ્છિતો ભરતો વાપિ શ્રુત્વા રામાભિભાષિતમ્ ।
ગર્હયામાસ રાજ્યં સ પ્રાહેદં રામસન્નિધૌ ॥ ૪॥

સત્યેન ચ શપે નાહં ત્વાં વિના દિવિ વા ભુવિ ।
કાઙ્ક્ષે રાજ્યં રઘુશ્રેષ્ઠ શપે ત્વત્પાદયોઃ પ્રભો ॥ ૫॥

ઇમૌ કુશલવૌ રાજન્નભિષિઞ્ચસ્વ રાઘવ ।
કોસલેષુ કુશં વીરમુત્તરેષુ લવં તથા ॥ ૬॥

ગચ્છન્તુ દૂતાસ્ત્વરિતં શત્રુઘ્નાનયનાય હિ ।
અસ્માકમેતદ્ગમનં સ્વર્વાસાય શૃણોતુ સઃ ॥ ૭॥

ભરતેનોદિતં શ્રુત્વા પતિતાસ્તાઃ સમીક્ષ્ય તમ્ ।

પ્રજાશ્ચ ભયસંવિગ્ના રામવિશ્લેષકાતરાઃ ॥ ૮॥

વસિષ્ઠો ભગવાન્ રામમુવાચ સદયં વચઃ ।
પશ્ય તાતાદરાત્સર્વાઃ પતિતા ભૂતલે પ્રજાઃ ॥ ૯॥

તાસાં ભાવાનુગં રામ પ્રસાદં કર્તુમર્હસિ ।
શ્રુત્વા વસિષ્ઠવચનં તાઃ સમુત્થાપ્ય પૂજ્ય ચ ॥ ૧૦॥

સસ્નેહો રઘુનાથસ્તાઃ કિં કરોમીતિ ચાબ્રવીત્ ।
તતઃ પ્રાઞ્જલયઃ પ્રોચુઃ પ્રજા ભક્ત્યા રઘૂદ્વહમ્ ॥ ૧૧॥

ગન્તુમિચ્છસિ યત્ર ત્વમનુગચ્છામહે વયમ્ ।
અસ્માકમેષા પરમા પ્રીતિર્ધર્મોઽયમક્ષયઃ ॥ ૧૨॥

તવાનુગમને રામ હૃદ્ગતા નો દૃઢા મતિઃ ।
પુત્રદારાદિભિઃ સાર્ધમનુયામોઽદ્ય સર્વથા ॥ ૧૩॥

તપોવનં વા સ્વર્ગં વા પુરં વા રઘુનન્દન ।
જ્ઞાત્વા તેષાં મનોદાર્ઢ્યં કાલસ્ય વચનં તથા ॥ ૧૪॥

ભક્તં પૌરજનં ચૈવ બાઢમિત્યાહ રાઘવઃ ।
કૃત્વૈવ નિશ્ચયં રામસ્તસ્મિન્નેવાહનિ પ્રભુઃ ॥ ૧૫॥

પ્રસ્થાપયામાસ ચ તૌ રામભદ્રઃ કુશીલવૌ ।
અષ્ટૌ રથસહસ્રાણિ સહસ્રં ચૈવ દન્તિનામ્ ॥ ૧૬॥

ષષ્ટિં ચાશ્વસહસ્રાણામેકૈકસ્મૈ દદૌ બલમ્ ।
બહુરત્નૌ બહુધનૌ હૃષ્ટપુષ્ટજનાવૃતૌ ॥ ૧૭॥

અભિવાદ્ય ગતૌ રામં કૃચ્છ્રેણ તુ કુશીલવૌ ।
શત્રુઘ્નાનયને દૂતાન્ પ્રેષયામાસ રાઘવઃ ॥ ૧૮॥

તે દૂતાસ્ત્વરિતં ગત્વા શત્રુઘ્નાય ન્યવેદયન્ ।
કાલસ્યાગમનં પશ્ચાદત્રિપુત્રસ્ય ચેષ્ટિતમ્ ॥ ૧૯॥

લક્ષ્મણસ્ય ચ નિર્યાણં પ્રતિજ્ઞાં રાઘવસ્ય ચ ।
પુત્રાભિષેચનં ચૈવ સર્વં રામચિકીર્ષિતમ્ ॥ ૨૦॥

શ્રુત્વા તદ્દૂતવચનં શ્ત્રુઘ્નઃ કુલનાશનમ્ ।
વ્યથિતોઽપિ ધૃતિં લબ્ધ્વા પુત્રાવાહૂય સત્વરઃ ।
અભિષિચ્ય સુબાહું વૈ મથુરાયાં મહાબલઃ ॥ ૨૧॥

યૂપકેતું ચ વિદિશાનગરે શત્રુસૂદનઃ ।
અયોધ્યાં ત્વરિતં પ્રાગાત્સ્વયં રામદિદૃક્ષયા ॥ ૨૨॥

દદર્શ ચ મહાત્માનં તેજસા જ્વલનપ્રભમ્ ।
દુકૂલયુગસંવીતં ઋષિભિશ્ચાક્ષયૈર્વૃતમ્ ॥ ૨૩॥

અભિવાદ્ય રમાનાથં શત્રુઘ્નો રઘુપુઙ્ગવમ્ ।
પ્રાઞ્જલિર્ધર્મસહિતં વાક્યં પ્રાહ મહામતિઃ ॥ ૨૪॥

અભિષિચ્ય સુતૌ તત્ર રાજ્યે રાજીવલોચન ।
તવાનુગમને રાજન્ વિદ્ધિ માં કૃતનિશ્ચયમ્ ॥ ૨૫॥

ત્યક્તું નાર્હસિ માં વીર ભક્તં તવ વિશેષતઃ ।
શત્રુઘ્નસ્ય દૃઢાં બુદ્ધિં વિજ્ઞાય રઘુનન્દનઃ ॥ ૨૬॥

સજ્જીભવતુ મધ્યાહ્ને ભવાનિત્યબ્રવીદ્વચઃ ।
અથ ક્ષણાત્સમુત્પેતુર્વાનરાઃ  કામરૂપિણઃ ॥ ૨૭॥

ઋક્ષાશ્ચ રાક્ષસાશ્ચૈવ ગોપુચ્છાશ્ચ સહસ્રશઃ ।
ઋષીણાં દેવતાનાં ચ પુત્રા રામસ્ય નિર્ગમમ્ ॥ ૨૮॥

શ્રુત્વા પ્રોચૂ રઘુશ્રેષ્ઠં સર્વે વાનરરાક્ષસાઃ ।
તવાનુગમને વિદ્ધિ નિશ્ચિતાર્થાન્ હિ નઃ પ્રભો ॥ ૨૯॥

એતસ્મિન્નન્તરે રામં સુગ્રીવોઽપિ મહાબલઃ ।
યથાવદભિવાદ્યાહ રાઘવં ભક્તવત્સલમ્ ॥ ૩૦॥

અભિષિચ્યાઙ્ગદં રાજ્યે આગતોઽસ્મિ મહાબલમ્ ।
તવાનુગમને રામ વિદ્ધિ માં કૃતનિશ્ચયમ્ ॥ ૩૧॥

શ્રુત્વા તેષાં દૃઢં વાક્યં ઋક્ષવાનરરક્ષસામ્ ।
વિભીષણમુવાચેદં વચનં મૃદુ સાદરમ્ ॥ ૩૨॥

ધરિષ્યતિ ધરા યાવત્પ્રજાસ્તાવત્પ્રશાધિ મે ।
વચનાદ્રાક્ષસં રાજ્યં શાપિતોઽસિ મમોપરિ ॥ ૩૩॥

ન કિઞ્ચિદુત્તરં વાચ્યં ત્વયા મત્કૃતકારણાત્ ।
એવં વિભીષણં તૂક્ત્વા હનૂમન્તમથાબ્રવીત્ ॥ ૩૪॥

મારુતે ત્વં ચિરઞ્જીવ મમાજ્ઞાં મા મૃષા કૃથાઃ ।

જામ્બવન્તમથ પ્રાહ તિષ્ઠ ત્વં દ્વાપરાન્તરે । ૩૫॥

મયા સાર્ધં ભવેદ્યુદ્ધં યત્કિઞ્ચિત્કારણાન્તરે ।
તતસ્તાન્ રાઘવઃ પ્રાહ ઋક્ષરાક્ષસવાનરાન્ ।
સર્વાનેવ મયા સાર્ધં પ્રયાતેતિ દયાન્વિતઃ ॥ ૩૬॥

તતઃ પ્રભાતે રઘુવંશનાથો
  વિશાલવક્ષાઃ સિતકઞ્જનેત્રઃ ।
પુરોધસં પ્રાહ વસિષ્ઠમાર્યં
  યાન્ત્વગ્નિહોત્રાણિ પુરો ગુરો મે । ૩૭॥

તતો વસિષ્ઠોઽપિ ચકાર સર્વં
  પ્રાસ્થાનિકં કર્મ મહદ્વિધાનાત્ ।
ક્ષૌમામ્બરો દર્ભપવિત્રપાણિઃ
  મહાપ્રયાણાય ગૃહીતબુદ્ધિઃ ॥ ૩૮॥

નિષ્ક્રમ્ય રામો નગરાત્સિતાભ્રા-
  ચ્છશીવ યાતઃ શશિકોટિકાન્તિઃ ।
રામસ્ય સવ્યે સિતપદ્મહસ્તા
  પદ્મા ગતા પદ્મવિશાલનેત્રા ॥ ૩૯॥

પાર્શ્વેઽથ દક્ષેઽરુણકઞ્જહસ્તા
  શ્યામા યયૌ ભૂરપિ દીપ્યમાના ।
શાસ્ત્રાણિ શસ્ત્રાણિ ધનુશ્ચ બાણા
  જગ્મુઃ પુરસ્તાદ્ધૃતવિગ્રહાસ્તે ॥ ૪૦॥

વેદાશ્ચ સર્વે ધૃતવિગ્રહાશ્ચ
  યયુશ્ચ સર્વે મુનયશ્ચ દિવ્યાઃ ।
માતા શ્રુતીનાં પ્રણવેન સાધ્વી
  યયૌ હરિં વ્યાહૃતિભિઃ સમેતા ॥ ૪૧॥

ગચ્છન્તમેવાનુગતા જનાસ્તે
  સપુત્રદારાઃ સહ બન્ધુવર્ગૈઃ ।
અનાવૃતદ્વારમિવાપવર્ગં
  રામં વ્રજન્તં યયુરાપ્તકામાઃ ।
સાન્તઃપુરઃ સાનુચરઃ સભાર્યઃ
  શત્રુઘ્નયુક્તો ભરતોઽનુયાતઃ ॥ ૪૨॥

ગચ્છન્તમાલોક્ય રમાસમેતં
　　શ્રીરાઘવં પૌરજનાઃ સમસ્તાઃ ।
સબાલવૃદ્ધાશ્ચ યયુર્દ્વિજાગ્ર્યાઃ
　　સામાત્યવર્ગાશ્ચ સમન્ત્રિણો યયુઃ ॥ ૪૩ ॥

સર્વે ગતાઃ ક્ષત્રમુખાઃ પ્રહૃષ્ટા
　　વૈશ્યાશ્ચ શૂદ્રાશ્ચ તથા પરે ચ ।
સુગ્રીવમુખ્યા હરિપુઙ્ગવાશ્ચ
　　સ્નાતા વિશુદ્ધાઃ શુભશબ્દયુક્તાઃ ॥ ૪૪ ॥

ન કશ્ચિદાસીદ્ભવદુઃખયુક્તો
　　દીનોઽથવા બાહ્યસુખેષુ સક્તઃ ।
આનન્દરૂપાનુગતા વિરક્તા
　　યયુશ્ચ રામં પશુભૃત્યવર્ગૈઃ ॥ ૪૫ ॥

ભૂતાન્યદૃશ્યાનિ ચ યાનિ તત્ર
　　યે પ્રાણિનઃ સ્થાવરજઙ્ગમાશ્ચ ।
સાક્ષાત્પરાત્માનમનન્તશક્તિં
　　જગ્મુર્વિમુક્તાઃ પરમેકમીશમ્ ॥ ૪૬ ॥

નાસીદયોધ્યાનગરે તુ જન્તુઃ
　　કશ્ચિત્તદા રામમના ન યાતઃ ।
શૂન્યં બભૂવાખિલમેવ તત્ર
　　પુરં ગતે રાજનિ રામચન્દ્રે ॥ ૪૭ ॥

તતોઽતિદૂરં નગરાત્સ ગત્વા
　　દૃષ્ટ્વા નદીં તાં હરિનેત્રજાતામ્ ।
નનન્દ રામઃ સ્મૃતપાવનોઽતો
　　દદર્શ ચાશેષમિદં હૃદિસ્થમ્ ॥ ૪૮ ॥

અથાગતસ્તત્ર પિતામહો મહાન્
　　દેવાશ્ચ સર્વે ઋષયશ્ચ સિદ્ધાઃ ।
વિમાનકોટીભિરપારપારં
　　સમાવૃતં ખં સુરસેવિતાભિઃ ॥ ૪૯ ॥

રવિપ્રકાશાભિરભિસ્ફુરત્સ્વં

જ્યોતિર્મયં તત્ર નભો બભૂવ ।
સ્વયમ્પ્રકાશૈર્મહતાં મહદ્ભિઃ
સમાવૃતં પુણ્યકૃતાં વરિષ્ઠૈઃ ॥ ૫૦॥

વવુશ્ચ વાતાશ્ચ સુગન્ધવન્તો
વવર્ષ વૃષ્ટિઃ કુસુમાવલીનામ્ ।
ઉપસ્થિતે દેવમૃદઙ્ગનાદે
ગાયત્સુ વિદ્યાધરકિન્નરેષુ ॥ ૫૧॥

રામસ્તુ પદ્ભ્યાં સરયૂજલં સકૃત્
સ્પૃષ્ટ્વા પરિક્રામદનન્તશક્તિઃ ।
બ્રહ્મા તદા પ્રાહ કૃતાઞ્જલિસ્તં
રામં પરાત્મન્ પરમેશ્વરસ્ત્વમ્ ॥ ૫૨॥

વિષ્ણુઃ સદાનન્દમયોઽસિ પૂર્ણો
જાનાસિ તત્ત્વં નિજમૈશમેકમ્ ।
તથાપિ દાસસ્ય મમાખિલેશ કૃતં
વચો ભક્તપરોઽસિ વિદ્વન્ ॥ ૫૩॥

ત્વં ભ્રાતૃભિર્વૈષ્ણવમેવમાદ્યં
પ્રવિશ્ય દેહં પરિપાહિ દેવાન્ ।
યદ્વા પરો વા યદિ રોચતે તં
પ્રવિશ્ય દેહં પરિપાહિ નસ્ત્વમ્ ॥ ૫૪॥

ત્વમેવ દેવાધિપતિશ્ચ વિષ્ણુઃ
જાનન્તિ ન ત્વાં પુરુષા વિના મામ્ ।
સહસ્રકૃત્વસ્તુ નમો નમસ્તે
પ્રસીદ દેવેશ પુનર્નમસ્તે ॥ ૫૫॥

પિતામહપ્રાર્થનયા સ રામઃ
પશ્યત્સુ દેવેષુ મહાપ્રકાશઃ ।
મુષ્ણંશ્ચ ચક્ષૂંષિ દિવૌકસાં તદા
બભૂવ ચક્રાદિયુતશ્ચતુર્ભુજઃ ॥ ૫૬॥

શેષો બભૂવેશ્વરતલ્પભૂતઃ
સૌમિત્રિરત્યદ્ભુતભોગધારી ।
બભૂવતુશ્ચક્રદરૌ ચ દિવ્યૌ

કૈકેયિસૂનુર્લવણાન્તકશ્ચ ॥ ૫૭॥

સીતા ચ લક્ષ્મીરભવત્પુરેવ
રામો હિ વિષ્ણુઃ પુરુષઃ પુરાણઃ ।
સહાનુજઃ પૂર્વશરીરકેણ
બભૂવ તેજોમયદિવ્યમૂર્તિઃ ॥ ૫૮॥

વિષ્ણું સમાસાદ્ય સુરેન્દ્રમુખ્યા
દેવાશ્ચ સિદ્ધા મુનયશ્ચ દક્ષાઃ ।
પિતામહાદ્યાઃ પરિતઃ પરેશં
સ્તવૈર્ગૃણન્તઃ પરિપૂજયન્તઃ ॥ ૫૯॥

આનન્દસમ્પ્લાવિતપૂર્ણચિત્તા
બભૂવિરે પ્રાપ્તમનોરથાસ્તે ।
તદાહ વિષ્ણુર્દ્રુહિણં મહાત્મા
એતે હિ ભક્તા મયિ ચાનુરક્તાઃ ॥ ૬૦॥

યાન્તં દિવં મામનુયાન્તિ સર્વે
તિર્યક્ષરીરા અપિ પુણ્યયુક્તાઃ ।
વૈકુણ્ઠસામ્યં પરમં પ્રયાન્તુ
સમાવિશસ્વાશુ મમાજ્ઞયા ત્વમ્ ॥ ૬૧॥

શ્રુત્વા હરેર્વાક્યમથાબ્રવીત્કઃ
સાન્તાનિકાન્ યાન્તુ વિચિત્રભોગાન્ ।
લોકાન્મદીયોપરિ દીપ્યમાનાન્
ત્વદ્ભાવયુક્તાઃ કૃતપુણ્યપુઞ્જાઃ ॥ ૬૨॥

યે ચાપિ તે રામ પવિત્રનામ
ગૃણન્તિ મર્ત્યા લયકાલ એવ ।
અજ્ઞાનતો વાપિ ભજન્તુ લોકાન્
તાનેવ યોગૈરપિ ચાધિગમ્યાન્ ॥ ૬૩॥

તતોઽતિહૃષ્ટા હરિરાક્ષસાદ્યાઃ
સ્પૃષ્ટ્વા જલં ત્યક્તકલેવરાસ્તે ।
પ્રપેદિરે પ્રાક્તનમેવ રૂપં
યદંશજા ઋક્ષહરીશ્વરાસ્તે ॥ ૬૪॥

પ્રભાકરં પ્રાપ હરિપ્રવીરઃ
    સુગ્રીવ આદિત્યજવીર્યવત્ત્વાત્ ।
તતો વિમગ્નાઃ સરયૂજલેષુ
    નરાઃ પરિત્યજ્ય મનુષ્યદેહમ્ ॥ ૬૫॥

આરુહ્ય દિવ્યાભરણા વિમાનં
    પ્રાપુશ્ચ તે સાન્તનિકાખ્યલોકાન્ ।
તિર્યક્પ્રજાતા અપિ રામદૃષ્ટા
    જલં પ્રવિષ્ટા દિવમેવ યાતાઃ ॥ ૬૬॥

દિદૃક્ષવો જાનપદાશ્ચ લોકા
    રામં સમાલોક્ય વિમુક્તસઙ્ગાઃ ।
સ્મૃત્વા હરિં લોકગુરું પરેશં
    સ્પૃષ્ટ્વા જલં સ્વર્ગમવાપુરઞ્જઃ ॥ ૬૭॥

એતાવદેવોત્તરમાહ શમ્ભુઃ
    શ્રીરામચન્દ્રસ્ય કથાવશેષમ્ ।
યઃ પાદમપ્યત્ર પઠેત્સ પાપાદ્-
    વિમુચ્યતે જન્મસહસ્રજાતાત્ ॥ ૬૮॥

દિને દિને પાપચયં પ્રકુર્વન્
    પઠેન્નરઃ શ્લોકમપીહ ભક્ત્યા ।
વિમુક્તસર્વાઘચયઃ પ્રયાતિ
    રામસ્ય સાલોક્યમનન્યલભ્યમ્ ॥ ૬૯॥

આખ્યાનમેતદ્રઘુનાયકસ્ય
    કૃતં પુરા રાઘવચોદિતેન ।
મહેશ્વરેણાપ્તભવિષ્યદર્થં
    શ્રુત્વા તુ રામઃ પરિતોષમેતિ ॥ ૭૦॥

રામાયણં કાવ્યમનન્તપુણ્યં
    શ્રીશઙ્કરેણાભિહિતં ભવાન્યૈ ।
ભક્ત્યા પઠેદ્યઃ શૃણુયાત્ સ પાપૈઃ
    વિમુચ્યતે જન્મશતોદ્ભવૈશ્ચ ॥ ૭૧॥

અધ્યાત્મરામં પઠતશ્ચ નિત્યં
    શ્રોતુશ્ચ ભક્ત્યા લિખિતુશ્ચ રામઃ ।

અતિપ્રસન્નશ્ચ સદા સમીપે
    સીતાસમેતઃ શ્રિયમાતનોતિ ॥ ૭૨॥

રામાયણં જનમનોહરમાદિકાવ્યં
    બ્રહ્માદિભિઃ સુરવરૈરપિ સંસ્તુતં ચ ।
શ્રદ્ધાન્વિતઃ પઠતિ યઃ શૃણુયાત્તુ નિત્યં
    વિષ્ણોઃ પ્રયાતિ સદનં સ વિશુદ્ધદેહઃ ॥ ૭૩॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે
ઉત્તરકાણ્ડે નવમઃ સર્ગઃ ॥ ૯॥

॥ સમાપ્તમિદમુત્તરકાણ્ડમ્ ॥

॥ સમ્પૂર્ણમ્ ઇતિ અધ્યાત્મરામાયણમ્ ॥

Encoded and proofread by Nagaraj Balijepalli nagaraj at iastate.edu
Revised by Agne Easwaran easwaranpsa at rediffmail.com and
ahimsasoldier at gmail.com

*adhyAtmarAmAyaNe uttarakANDam*
pdf was typeset on September 29, 2018

Please send corrections to *sanskrit@cheerful.com*